१६. छट्ठे **निब्बिदाया**ति निब्बिन्दनत्थाय। **विरागाया**ति विरज्जनत्थाय। **निरोधाया**ति निरुज्झनत्थाय। **पटिपन्नो होती**ति एत्थ सीलतो पट्ठाय याव अरहत्तमग्गा पटिपन्नोति वेदितब्बो। **धम्मानुधम्मप्पटिपन्नो**ति लोकुत्तरस्स

निब्बानधम्मस्स अनुधम्मभूतं पटिपदं पटिपन्नो। **अनुधम्मभूत**न्ति अनुरूपसभावभूतं। **निब्बिदा विरागा निरोधा**ति निब्बिदाय चेव विरागेन च निरोधेन च। **अनुपादा विमुत्तो**ति चतूहि उपादानेहि किञ्चि धम्मं अनुपादियित्वा विमुत्तो। **दिट्ठधम्मनिब्बानप्पत्तो**ति दिट्ठेव धम्मे निब्बानप्पत्तो। **अलं वचनाया**ति, एवं वत्तब्बतं अरहति, युत्तो अनुच्छविकोति अत्थो। एवमेत्थ एकेन नयेन धम्मकथिकस्स पुच्छा कथिता, द्वीहि तं विसेसेत्वा सेक्खासेक्खभूमियो निद्दिट्ठाति। छट्ठं।

७. अचेलकस्सपसुत्तवण्णना

१७. सत्तमे **अचेलो कस्सपो**ति लिङ्गेन अचेलो निच्चेलो, नामेन कस्सपो। **दूरतोवा**ति महता भिक्खुसङ्घेन परिवुतं आगच्छन्तं दूरतो एव अद्दस। **किञ्चिदेव देस**न्ति किञ्चिदेव कारणं। **ओकास**न्ति पञ्हब्याकरणस्स खणं कालं। **अन्तरघर**न्ति ''न पल्लत्थिकाय अन्तरघरे निसीदिस्सामी''ति एत्थ अन्तोनिवेसनं अन्तरघरं। ''ओक्खित्तचक्खु अन्तरघरे गमिस्सामी''ति एत्थ इन्दखीलतो पट्ठाय अन्तोगामो। इधापि अयमेव अधिप्पेतो। **यदाकङ्खसी**ति यं इच्छसि।

कस्मा पन भगवा कथेतुकामो यावततियं पटिक्खिपीति? गारवजननत्थं। दिट्ठिगतिका हि खिप्पं कथियमाने गारवं न करोन्ति, ''समणं गोतमं उपसङ्कमितुम्पि पुच्छितुम्पि सुकरं, पुच्छितमत्तेयेव कथेती''ति वचनम्पि न सद्दहन्ति। द्वे तयो वारे पटिक्खित्ते पन गारवं करोन्ति, ''समणं गोतमं उपसङ्कमितुम्पि पञ्हं पुच्छितुम्पि दुक्कर''न्ति यावततियं याचिते कथियमानं सुस्सूसन्ति सद्दहन्ति। इति भगवा ''अयं सुस्सूसिस्सति सद्दहिस्सती''ति यावततियं याचापेत्वा कथेसि। अपिच यथा भिसक्को तेलं वा फाणितं वा पचन्तो मुदुपाकखरपाकानं पाककालं आगमयमानो पाककालं अनतिक्कमित्वाव ओतारेति। एवं भगवा सत्तानं ञाणपरिपाकं आगमयमानो ''एत्तकेन कालेन इमस्स ञाणं परिपाकं गमिस्सती''ति ञत्वाव यावततियं याचापेसि।

मा हेवं, कस्सपाति, कस्सप, मा एवं भणि। **सयंकतं दुक्ख**न्ति हि वत्तुं न वट्टति, अत्ता नाम कोचि दुक्खस्स कारको नत्थीति दीपेति। परतोपि एसेव नयो। **अधिच्चसमुप्पन्न**न्ति अकारणेन यदिच्छाय उप्पन्नं। **इति पुट्ठो समानो**ति कस्मा एवमाह? एवं किरस्स अहोसि – ''अयं 'सयंकतं दुक्ख'न्तिआदिना पुट्ठो 'मा हेव'न्ति वदति, 'नत्थी'ति पुट्ठो 'अत्थी'ति वदति। 'भवं गोतमो दुक्खं न जानाति न पस्सती'ति पुट्ठो 'जानामि ख्वाह'न्ति वदति। किञ्चि नु खो मया विरज्झित्वा पुच्छितो''ति मूलतो पट्ठाय अत्तनो पुच्छमेव सोधेन्तो एवमाह। **आचिक्खतु च मे, भन्ते, भगवा**ति इध सत्थरि सञ्जातगारवो ''भव''न्ति अवत्वा ''भगवा''ति वदति।

सो करोतीतिआदि, ''सयंकतं दुक्ख''न्ति लद्धिया पटिसेधनत्थं वुत्तं। एत्थ च **सतो**ति इदं भुम्मत्थे सामिवचनं, तस्मा एवमत्थो दट्ठब्बो – सो करोति सो पटिसंवेदयतीति खो, कस्सप, आदिम्हियेव एवं सति पच्छा सयंकतं दुक्खन्ति अयं लद्धि होति। एत्थ च **दुक्ख**न्ति वट्टदुक्खं अधिप्पेतं। **इति वद**न्ति एतस्स पुरिमेन आदिसद्देन अनन्तरेन च सस्सतसद्देन सम्बन्धो होति। ''दीपेति गण्हाती''ति अयं पनेत्थ पाठसेसो। इदञ्हि वुत्तं होति – इति एवं वदन्तो आदितोव सस्सतं दीपेति, सस्सतं गण्हाति। कस्मा? तस्स हि तं दस्सनं एतं परेति, कारकञ्च वेदकञ्च एकमेव गण्हन्तं एतं सस्सतं उपगच्छतीति अत्थो।

अञ्ञो करोतीतिआदि पन ''परंकतं दुक्ख''न्ति लद्धिया पटिसेधनत्थं वुत्तं। ''आदितो सतो''ति इदं पन इधापि आहरितब्बं। अयञ्हेत्थ अत्थो – अञ्ञो करोति अञ्ञो पटिसंवेदियतीति खो पन, कस्सप, आदिम्हियेव एवं सति, पच्छा ''कारको इधेव उच्छिज्जति, तेन कतं अञ्ञो पटिसंवेदियती''ति एवं उप्पन्नाय उच्छेददिट्ठिया सद्धिं सम्पयुत्ताय वेदनाय अभितुन्नस्स विद्धस्स सतो ''परंकतं दुक्ख''न्ति अयं लद्धि होतीति। **इति वद**न्तिआदि वुत्तनयेनेव योजेतब्बं। तत्रायं

योजना – एवञ्च वदन्तो आदितोव उच्छेदं दीपेति, उच्छेदं गण्हाति। कस्मा? तस्स हि तं दस्सनं एतं परेति, एतं उच्छेदं उपगच्छतीति अत्थो।

एते तेति ये सस्सतुच्छेदसङ्खाते उभो अन्ते (अनुपगम्म तथागतो धम्मं देसेति, एते ते, कस्सप, उभो अन्ते) अनुपगम्म पहाय अनल्लीयित्वा मज्झेन तथागतो धम्मं देसेति, मज्झिमाय पटिपदाय ठितो देसेतीति अत्थो। कतरं धम्मन्ति चे? यदिदं अविज्जापच्चया सङ्खाराति। एत्थ हि कारणतो फलं, कारणनिरोधेन चस्स निरोधो दीपितो, न कोचि कारको वा वेदको वा निद्दिट्ठो। एत्तावता सेसपञ्हा पटिसेधिता होन्ति। **उभो अन्ते अनुपगम्मा**ति इमिना हि ततियपञ्हो पटिक्खित्तो। **अविज्जापच्चया सङ्खारा**ति इमिना अधिच्चसमुप्पन्नता चेव अजाननञ्च पटिक्खित्तन्ति वेदितब्बं।

लभेय्यन्ति इदं सो भगवतो सन्तिके भिक्खुभावं पत्थयमानो आह। अथ भगवा योनेन खन्धके तित्थियपरिवासो (महाव० ८६) पञ्ञत्तो, यं अञ्ञतित्थियपुब्बो सामणेरभूमियं ठितो ''अहं, भन्ते, इत्थन्नामो अञ्ञतित्थियपुब्बो इमस्मिं धम्मविनये आकङ्खामि उपसम्पदं। स्वाहं, भन्ते, सङ्घं चत्तारो मासे परिवासं याचामी''तिआदिना नयेन समादियित्वा परिवसति, तं सन्धाय **यो खो, कस्सप, अञ्ञतित्थियपुब्बो**तिआदिमाह। तत्थ **पब्बज्ज**न्ति वचनसिलिट्ठतावसेन वुत्तं। अपरिवसित्वायेव हि पब्बज्जं लभति। उपसम्पदत्थिकेन पन नातिकालेन गामप्पवेसनादीनि अट्ठ वत्तानि पूरेन्तेन परिवसितब्बं। **आरद्धचित्ता**ति अट्ठवत्तपूरणेन तुट्ठचित्ता। अयमेत्थ सङ्खेपो, वित्थारतो पनेस तित्थियपरिवासो समन्तपासादिकाय विनयट्ठकथाय पब्बज्जक्खन्धकवण्णनायं (महाव० अट्ठ० ८६) वुत्तनयेनेव वेदितब्बो।

अपिच मयाति अयमेत्थ पाठो, अञ्ञत्थ पन ''अपिच मेत्था''ति। **पुग्गलवेमत्तता विदिता**ति पुग्गलनानत्तं विदितं। ''अयं पुग्गलो परिवासारहो, अयं न परिवासारहो''ति इदं मय्हं पाकटन्ति दस्सेति। ततो कस्सपो चिन्तेसि – ''अहो अच्छरियं बुद्धसासनं, यत्थ एवं घंसित्वा कोट्टेत्वा युत्तमेव गण्हन्ति, अयुत्तं छड्डेन्ती''ति। ततो सुट्ठुतरं पब्बज्जाय सञ्जातुस्साहो **सचे, भन्ते**तिआदिमाह। अथ भगवा तस्स तिब्बच्छन्दतं विदित्वा ''न कस्सपो परिवासं अरहती''ति अञ्ञतरं भिक्खुं आमन्तेसि – ''गच्छ, भिक्खु, कस्सपं नहापेत्वा पब्बाजेत्वा आनेही''ति। सो तथा कत्वा तं पब्बाजेत्वा भगवतो सन्तिकं अगमासि। भगवा गणे निसीदित्वा उपसम्पादेसि। तेन वुत्तं **अलत्थ खो अचेलो कस्सपो भगवतो सन्तिके पब्बज्जं, अलत्थ उपसम्पद**न्ति। **अचिरूपसम्पन्नो**तिआदि सेसं ब्राह्मणसंयुत्ते (सं० नि० १.१८७) वुत्तमेवाति।

सत्तमं।

८. तिम्बरुकसुत्तवण्णना

१८. अट्ठमे **सा वेदना**तिआदि ''सयंकतं सुखदुक्ख''न्ति लद्धिया निसेधनत्थं वुत्तं। एत्थापि **सतो**ति भुम्मत्थेयेव सामिवचनं। तत्रायं अत्थदीपना – ''सा वेदना, सो वेदियती''ति खो, तिम्बरुक, आदिम्हियेव एवं सति ''सयंकतं सुखदुक्ख''न्ति अयं लद्धि होति। एवञ्हि सति वेदनाय एव वेदना कता होति। एवञ्च वदन्तो इमिस्सा वेदनाय पुब्बेपि अत्थितं अनुजानाति, सस्सतं दीपेति सस्सतं गण्हाति। कस्मा? तस्स हि तं दस्सनं एतं परेति, एतं सस्सतं उपगच्छतीति अत्थो। पुरिमञ्हि अत्थं सन्धायेवेतं भगवता वुत्तं भविस्सति, तस्मा अट्ठकथायं तं योजेत्वावस्स अत्थो दीपितो। **एवम्पाहं न वदामी**ति अहं ''सा वेदना, सो वेदियती''ति एवम्पि न वदामि। ''सयंकतं सुखदुक्ख''न्ति एवम्पि न वदामीति अत्थो।

अञ्ञा वेदनातिआदि ''परंकतं सुखदुक्ख''न्ति लद्धिया पटिसेधनत्थं वुत्तं। इधापि अयं अत्थयोजना –''अञ्ञा वेदना अञ्ञो वेदियती''ति खो, तिम्बरुक, आदिम्हियेव एवं सति पच्छा या पुरिमपक्खे कारकवेदना, सा उच्छिन्ना। ताय

पन कतं अञ्ञो वेदियतीति एवं उप्पन्नाय उच्छेददिट्ठिया सद्धिं सम्पयुत्ताय वेदनाय अभितुन्नस्स सतो ''परंकतं सुखदुक्ख''न्ति अयं लद्धि होति। एवञ्च वदन्तो कारको उच्छिन्नो, अञ्ञेन पटिसन्धि गहिताति उच्छेदं दीपेति, उच्छेदं गण्हाति। कस्मा? तस्स हि तं दस्सनं एतं परेति, एतं उच्छेदं उपगच्छतीति अत्थो। इधापि हि इमानि पदानि अट्ठकथायं आहरित्वा योजितानेव। इमस्मिं सुत्ते वेदनासुखदुक्खं कथितं। तञ्च खो विपाकसुखदुक्खमेव वट्टतीति वुत्तं। अट्ठमं।

९. बालपण्डितसुत्तवण्णना

१९. नवमे **अविज्जानीवरणस्सा**ति अविज्जाय निवारितस्स। **एवमयं कायो समुदागतो**ति एवं अविज्जाय निवारितत्ता तण्हाय च सम्पयुत्तत्तायेव अयं कायो निब्बत्तो। **अयञ्चेव कायो**ति अयञ्चस्स अत्तनो सविञ्ञाणको कायो। **बहिद्धा च नामरूप**न्ति बहिद्धा च परेसं सविञ्ञाणको कायो। अत्तनो च परस्स च पञ्चहि खन्धेहि छहि आयतनेहि चापि अयं अत्थो दीपेतब्बोव। **इत्थेतं द्वय**न्ति एवमेतं द्वयं। **द्वयं पटिच्च फस्सो**ति अञ्ञत्थ चक्खुरूपादीनि द्वयानि पटिच्च चक्खुसम्फस्सादयो वुत्ता, इध पन अज्झत्तिकबाहिरानि आयतनानि। महाद्वयं नाम किरेतं। **सळेवायतनानी**ति सळेव फस्सायतनानि फस्सकारणानि। **येहि फुट्ठो**ति येहि कारणभूतेहि आयतनेहि उप्पन्नेन फस्सेन फुट्ठो। **अञ्ञतरेना**ति एत्थ परिपुण्णवसेन अञ्ञतरता वेदितब्बा। **तत्रा**ति तस्मिं बालपण्डितानं कायनिब्बत्तनादिम्हि। **को अधिप्पयासो**ति को अधिकपयोगो।

भगवंमूलकाति भगवा मूलं एतेसन्ति भगवंमूलका। इदं वुत्तं होति — इमे, भन्ते, अम्हाकं धम्मा पुब्बे कस्सपसम्मासम्बुद्धेन उप्पादिता, तस्मिं परिनिब्बुते एकं बुद्धन्तरं अञ्ञो समणो वा ब्राह्मणो वा इमे धम्मे उप्पादेतुं समत्थो नाम नाहोसि, भगवता पन नो इमे धम्मा उप्पादिता। भगवन्तञ्हि निस्साय मयं इमे धम्मे आजानाम पटिविज्झामाति एवं भगवंमूलका नो, भन्ते, धम्माति। **भगवंनेत्तिका**ति भगवा हि धम्मानं नेता विनेता अनुनेता, यथासभावतो पाटियेक्कं पाटियेक्कं नामं गहेत्वा दस्सेताति धम्मा भगवंनेत्तिका नाम होन्ति। **भगवंपटिसरणा**ति चतुभूमकधम्मा सब्बञ्ञुतञ्ञाणस्स आपाथं आगच्छमाना भगवति पटिसरन्ति नामाति भगवंपटिसरणा। **पटिसरन्ती**ति समोसरन्ति। अपिच महाबोधिमण्डे निसिन्नस्स भगवतो पटिवेधवसेन फस्सो आगच्छति ''अहं भगवा किन्नामो''ति? त्वं फुसनट्ठेन फस्सो नाम। वेदना, सञ्ञा, सङ्खारा, विञ्ञाणं आगच्छति ''अहं भगवा किन्नाम''न्ति, त्वं विजाननट्ठेन विञ्ञाणं नामाति एवं चतुभूमकधम्मानं यथासभावतो पाटियेक्कं पाटियेक्कं नामं गण्हन्तो भगवा धम्मे पटिसरतीति भगवंपटिसरणा। **भगवन्तंयेव पटिभातू**ति भगवतोव एतस्स भासितस्स अत्थो उपट्ठातु, तुम्हेयेव नो कथेत्वा देथाति अत्थो।

सा चेव अविज्जाति एत्थ किञ्चापि सा अविज्जा च तण्हा च कम्मं जवापेत्वा पटिसन्धिं आकड्ढित्वा निरुद्धा, यथा पन अज्जापि यं हिय्यो भेसज्जं पीतं, तदेव भोजनं भुञ्जाति सरिक्खकत्तेन तदेवाति वुच्चति, एवमिधापि सा चेव अविज्जा सा च तण्हाति इदम्पि सरिक्खकत्तेन वुत्तं। **ब्रह्मचरिय**न्ति मग्गब्रह्मचरियं। **दुक्खक्खयाया**ति वट्टदुक्खस्स खयत्थाय। **कायूपगो होती**ति अञ्ञं पटिसन्धिकायं उपगन्ता होति। **यदिदं ब्रह्मचरियवासो**ति यो अयं मग्गब्रह्मचरियवासो, अयं बालतो पण्डितस्स विसेसोति दस्सेति। इति इमस्मिं सुत्ते सब्बोपि सपटिसन्धिको पुथुज्जनो ''बालो''ति, अप्पटिसन्धिको खीणासवो ''पण्डितो''ति वुत्तो। सोतापन्नसकदागामिअनागामिनो पन ''पण्डिता''ति वा ''बाला''ति वा न वत्तब्बा, भजमाना पन पण्डितपक्खं भजन्ति। नवमं।

१०. पच्चयसुत्तवण्णना

२०. दसमे **पटिच्चसमुप्पादञ्च वो भिक्खवे, देसेस्सामि पटिच्चसमुप्पन्ने च धम्मे**ति सत्था इमस्मिं सुत्ते पच्चये च पच्चयनिब्बत्ते च सभावधम्मे देसेस्सामीति उभयं आरभि। **उप्पादा वा तथागतान**न्ति तथागतानं उप्पादेपि, बुद्धेसु उप्पन्नेसु अनुप्पन्नेसुपि जातिपच्चया जरामरणं, जातियेव जरामरणस्स पच्चयो। **ठिताव सा धातू**ति ठितोव सो पच्चयसभावो, न कदाचि जाति जरामरणस्स पच्चयो न होति। **धम्मट्ठितता धम्मनियामता**ति इमेहिपि द्वीहि पच्चयमेव कथेति। पच्चयेन हि पच्चयुप्पन्ना धम्मा तिट्ठन्ति, तस्मा पच्चयोव ''धम्मट्ठितता''ति वुच्चति। पच्चयो धम्मे नियमेति, तस्मा ''धम्मनियामता''ति वुच्चति। **इदप्पच्चयता**ति इमेसं जरामरणादीनं पच्चया इदप्पच्चया, इदप्पच्चयाव इदप्पच्चयता। **त**न्ति तं पच्चयं। **अभिसम्बुज्झती**ति ञाणेन अभिसम्बुज्झति। **अभिसमेती**ति ञाणेन अभिसमागच्छति। **आचिक्खती**ति कथेति। **देसेती**ति दस्सेति। **पञ्ञापेती**ति जानापेति। **पट्ठपेती**ति ञाणमुखे ठपेति। **विवरती**ति विवरित्वा दस्सेति। **विभजती**ति विभागतो दस्सेति। **उत्तानीकरोती**ति पाकटं करोति। **पस्सथाति चाहा**ति पस्सथ इति च वदति। किन्ति? **जातिपच्चया, भिक्खवे, जरामरण**न्तिआदि।

इति खो, भिक्खवेति एवं खो, भिक्खवे। **या तत्रा**ति या तेसु ''जातिपच्चया जरामरण''न्तिआदीसु। **तथता**तिआदीनि पच्चयाकारस्सेव वेवचनानि। सो तेहि तेहि पच्चयेहि अनूनाधिकेहेव तस्स तस्स धम्मस्स सम्भवतो **तथता**ति, सामग्गिं उपगतेसु पच्चयेसु मुहुत्तम्पि ततो निब्बत्तानं धम्मानं असम्भवाभावतो **अवितथता**ति, अञ्ञधम्मपच्चयेहि अञ्ञधम्मानुप्पत्तितो **अनञ्ञथता**ति, जरामरणादीनं पच्चयतो वा पच्चयसमूहतो वा **इदप्पच्चयता**ति वुत्तो। तत्रायं वचनत्थो — इमेसं पच्चया इदप्पच्चया, इदप्पच्चया एव इदप्पच्चयता, इदप्पच्चयानं वा समूहो इदप्पच्चयता। लक्खणं पनेत्थ सद्दसत्थतो वेदितब्बं।

अनिच्चन्ति हुत्वा अभावट्ठेन अनिच्चं। एत्थ च अनिच्चन्ति न जरामरणं अनिच्चं, अनिच्चसभावानं पन खन्धानं जरामरणत्ता अनिच्चं नाम जातं। **सङ्खता**दीसुपि एसेव नयो। एत्थ च **सङ्खत**न्ति पच्चयेहि समागन्त्वा कतं। **पटिच्चसमुप्पन्न**न्ति पच्चये निस्साय उप्पन्नं। **खयधम्म**न्ति खयसभावं। **वयधम्म**न्ति विगच्छनकसभावं। **विरागधम्म**न्ति विरज्जनकसभावं। **निरोधधम्म**न्ति निरुज्झनकसभावं। जातियापि वुत्तनयेनेव अनिच्चता वेदितब्बा। जनकपच्चयानं वा किच्चानुभावक्खणे दिट्ठत्ता एकेन परियायेनेत्थ अनिच्चातिआदीनि युज्जन्तियेव। भवादयो अनिच्चादिसभावायेव।

सम्मप्पञ्ञायाति सविपस्सनाय मग्गपञ्ञाय। **पुब्बन्त**न्ति पुरिमं अतीतन्ति अत्थो। **अहोसिं नु खो**तिआदीसु ''अहोसिं नु खो ननु खो''ति सस्सताकारञ्च अधिच्चसमुप्पत्तिआकारञ्च निस्साय अतीते अत्तनो विज्जमानतञ्च अविज्जमानतञ्च कङ्खति। किं कारणन्ति न वत्तब्बं, उम्मत्तको विय बालपुथुज्जनो यथा वा तथा वा पवत्तति। **किं नु खो अहोसि**न्ति जातिलिङ्गुपपत्तियो निस्साय ''खत्तियो नु खो अहोसिं, ब्राह्मणवेस्ससुद्दगहट्ठपब्बजितदेवमनुस्सानं अञ्ञतरो''ति कङ्खति। **कथं नु खो**ति सण्ठानाकारं निस्साय ''दीघो नु खो अहोसिं रस्सओदातकण्हपमाणिकअप्पमाणिकादीनं अञ्ञतरो''ति कङ्खति। केचि पन ''इस्सरनिम्मानादीनि निस्साय 'केन नु खो कारणेन अहोसि'न्ति हेतुतो कङ्खती''ति वदन्ति। **किं हुत्वा किं अहोसि**न्ति जातिआदीनि निस्साय ''खत्तियो हुत्वा नु खो ब्राह्मणो अहोसिं...पे०... देवो हुत्वा मनुस्सो''ति अत्तनो परम्परं कङ्खति। सब्बत्थेव पन **अद्धान**न्ति कालाधिवचनमेतं। **अपरन्त**न्ति अनागतं अन्तं। **भविस्सामि नु खो ननु खो**ति सस्सताकारञ्च उच्छेदाकारञ्च निस्साय अनागते अत्तनो विज्जमानतञ्च अविज्जमानतञ्च कङ्खति। सेसमेत्थ वुत्तनयमेव।

एतरहि वा पच्चुप्पन्नं अद्धानन्ति इदानि वा पटिसन्धिमादिं कत्वा चुतिपरियन्तं सब्बम्पि वत्तमानकालं गहेत्वा।

अज्झत्तं कथंकथी भविस्सतीति अत्तनो खन्धेसु विचिकिच्छी भविस्सति। **अहं नु खोस्मी**ति अत्तनो अत्थिभावं कङ्खति। युत्तं पनेतन्ति? युत्तं अयुत्तन्ति का एत्थ चिन्ता। अपिचेत्थ इदं वत्थुम्पि उदाहरन्ति – चूळमाताय किर पुत्तो मुण्डो, महामाताय पुत्तो अमुण्डो, तं पुत्तं मुण्डेसुं, सो उट्ठाय ''अहं नु खो चूळमाताय पुत्तो''ति चिन्तेसि। एवं अहं नु खोस्मीति कङ्खा होति। **नो नु खोस्मी**ति अत्तनो नत्थिभावं कङ्खति। तत्रापि इदं वत्थु – एको किर मच्छे गण्हन्तो उदके चिरट्ठानेन सीतिभूतं अत्तनो ऊरुं मच्छोति चिन्तेत्वा पहरि। अपरो सुसानपस्से खेत्तं रक्खन्तो भीतो सङ्कुटितो सयि, सो पटिबुज्झित्वा अत्तनो जण्णुकानि द्वे यक्खाति चिन्तेत्वा पहरि। एवं नो नु खोस्मीति कङ्खति।

किं नु खोस्मीति खत्तियोव समानो अत्तनो खत्तियभावं कङ्खति। एसेव नयो सेसेसुपि। देवो पन समानो देवभावं अजानन्तो नाम नत्थि, सोपि पन ''अहं रूपी नु खो अरूपी नु खो''तिआदिना नयेन कङ्खति। खत्तियादयो कस्मा न जानन्तीति चे? अपच्चक्खा तेसं तत्थ तत्थ कुले उप्पत्ति। गहट्ठापि च पोत्थलिकादयो पब्बजितसञ्ञिनो, पब्बजितापि ''कुप्पं नु खो मे कम्म''न्तिआदिना नयेन गहट्ठसञ्ञिनो। मनुस्सापि च राजानो विय अत्तनि देवसञ्ञिनो होन्ति। **कथं नु खोस्मी**ति वुत्तनयमेव। केवलञ्हेत्थ अब्भन्तरे जीवो नाम अत्थीति गहेत्वा तस्स सण्ठानाकारं निस्साय ''दीघो नु खोस्मि रस्सचतुरस्सछळंसअट्ठंससोळसंसादीनं अञ्ञतरप्पकारो''ति कङ्खन्तो कथं नु खोस्मीति? कङ्खतीति वेदितब्बो। सरीरसण्ठानं पन पच्चुप्पन्नं अजानन्तो नाम नत्थि। **कुतो आगतो सो कुहिं गामी भविस्सती**ति अत्तभावस्स आगतिगतिट्ठानं कङ्खन्तो एवं कङ्खति। **अरियसावकस्सा**ति इध सोतापन्नो अधिप्पेतो, इतरेपि पन तयो अवारितायेवाति। दसमं।

आहारवग्गो दुतियो।

३. दसबलवग्गो

१. दसबलसुत्तवण्णना

२१. दसबलवग्गस्स पठमं दुतियस्सेव सङ्खेपो।

२. दुतियदसबलसुत्तवण्णना

२२. दुतियं भगवता अत्तनो अज्झासयस्स वसेन वुत्तं। तत्थ **दसबलसमन्नागतो**ति दसहि बलेहि समन्नागतो। बलञ्च नामेतं दुविधं कायबलञ्च ञाणबलञ्च। तेसु तथागतस्स कायबलं हत्थिकुलानुसारेन वेदितब्बं। वुत्तञ्हेतं पोराणेहि –

> ''काळावकञ्च गङ्गेय्यं, पण्डरं तम्बपिङ्गलं।
> गन्धमङ्गलहेमञ्च, उपोसथछद्दन्तिमे दसा''ति॥(म॰ नि॰ अट्ठ॰ १.१४८; विभ॰ अट्ठ॰ ७६०)। –

इमानि दस हत्थिकुलानि। तत्थ **काळावक**न्ति पकतिहत्थिकुलं दट्ठब्बं। यं दसन्नं पुरिसानं कायबलं, तं एकस्स काळावकस्स हत्थिनो। यं दसन्नं काळावकानं बलं, तं एकस्स गङ्गेय्यस्स। यं दसन्नं गङ्गेय्यानं, तं एकस्स पण्डरस्स। यं दसन्नं पण्डरानं, तं एकस्स तम्बस्स। यं दसन्नं तम्बानं, तं एकस्स पिङ्गलस्स। यं दसन्नं पिङ्गलानं, तं एकस्स गन्धहत्थिनो। यं दसन्नं गन्धहत्थीनं, तं एकस्स मङ्गलस्स। यं दसन्नं मङ्गलानं, तं एकस्स हेमवतस्स। यं दसन्नं हेमवतानं, तं एकस्स

उपोसथस्स। यं दसन्नं उपोसथानं, तं एकस्स छद्दन्तस्स। यं दसन्नं छद्दन्तानं, तं एकस्स तथागतस्स। नारायनसङ्घातबलन्तिपि इदमेव वुच्चति। तदेतं पकतिहत्थिगणनाय हत्थीनं कोटिसहस्सानं, पुरिसगणनाय दसन्नं पुरिसकोटिसहस्सानं बलं होति। इदं ताव तथागतस्स कायबलं। ''दसबलसमन्नागतो''ति एत्थ पन एतं सङ्गहं न गच्छति। एतञ्हि बाहिरकं लामकं तिरच्छानगतानं सीहादीनम्पि होति। एतञ्हि निस्साय दुक्खपरिञ्ञा वा समुदयप्पहानं वा मग्गभावना वा फलसच्छिकिरिया वा नत्थि। अञ्ञं पन दससु ठानेसु अकम्पनत्थेन उपत्थम्भनत्थेन च दसविधं ञाणबलं नाम अत्थि। तं सन्धाय वुत्तं ''दसबलसमन्नागतो''ति।

कतमं पन तन्ति? ठानाट्ठानादीनं यथाभूतं जाननं। सेय्यथिदं – ठानञ्च ठानतो अट्ठानञ्च अट्ठानतो जाननं एकं, अतीतानागतपच्चुप्पन्नानं कम्मसमादानानं ठानसो हेतुसो यथाभूतं विपाकजाननं एकं, सब्बत्थगामिनिपटिपदाजाननं एकं, अनेकधातुनानाधातुलोकजाननं एकं, परसत्तानं परपुग्गलानं नानाधिमुत्तिकताजाननं एकं, तेसंयेव इन्द्रियपरोपरियत्तजाननं एकं, झानविमोक्खसमाधिसमापत्तीनं संकिलेसवोदानवुट्ठानजाननं एकं, पुब्बेनिवासजाननं एकं, सत्तानं चुतूपपातजाननं एकं, आसवक्खयजाननं एकन्ति। अभिधम्मे पन –

> ''इध तथागतो ठानञ्च ठानतो अट्ठानञ्च अट्ठानतो यथाभूतं पजानाति। यम्पि तथागतो ठानञ्च ठानतो अट्ठानञ्च अट्ठानतो यथाभूतं पजानाति। इदम्पि तथागतस्स तथागतबलं होति, यं बलं आगम्म तथागतो आसभं ठानं पटिजानाति, परिसासु सीहनादं नदति, ब्रह्मचक्कं पवत्तेती''ति।

आदिना (विभ॰ ७६०) नयेन वित्थारतो आगतानेव। अत्थवण्णनापि नेसं विभङ्गट्ठकथायञ्चेव (विभ॰ अट्ठ॰ ७६०) पपञ्चसूदनिया च मज्झिमट्ठकथाय (म॰ नि॰ अट्ठ॰ १.१४८) सब्बाकारतो वुत्ता। सा तत्थ वुत्तनयेनेव गहेतब्बा।

चतूहि च वेसारज्जेहीति एत्थ सारज्जपटिपक्खं वेसारज्जं, चतूसु ठानेसु वेसारज्जभावं पच्चवेक्खन्तस्स उप्पन्नसोमनस्समयञाणस्सेतं नामं। कतमेसु चतूसु? ''सम्मासम्बुद्धस्स ते पटिजानतो इमे धम्मा अनभिसम्बुद्धा''तिआदीसु चोदनावत्थूसु। तत्रायं पाळि –

> ''चत्तारिमानि, भिक्खवे, तथागतस्स वेसारज्जानि...पे॰...। कतमानि चत्तारि? 'सम्मासम्बुद्धस्स ते पटिजानतो इमे धम्मा अनभिसम्बुद्धा'ति तत्र वत मं समणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा कोचि वा लोकस्मिं सह धम्मेन पटिचोदेस्सतीति निमित्तमेतं, भिक्खवे, न समनुपस्सामि। एतमहं, भिक्खवे, निमित्तं असमनुपस्सन्तो खेमप्पत्तो अभयप्पत्तो वेसारज्जप्पत्तो विहरामि। 'खीणासवस्स ते पटिजानतो इमे आसवा अपरिक्खीणा'ति तत्र वत मं...पे॰... 'ये खो पन ते अन्तरायिका धम्मा वुत्ता, ते पटिसेवतो नालं अन्तरायाया'ति तत्र वत मं...पे॰... 'यस्स खो पन ते अत्थाय धम्मो देसितो, सो न निय्याति तक्करस्स सम्मा दुक्खक्खयाया'ति तत्र वत मं समणो वा ब्राह्मणो वा...पे॰... वेसारज्जप्पत्तो विहरामी''ति (अ॰ नि॰ ४.८)।

आसभं ठानन्ति सेट्ठट्ठानं उत्तमट्ठानं। आसभा वा पुब्बबुद्धा, तेसं ठानन्ति अत्थो। अपिच गवसतजेट्ठको उसभो, गवसहस्सजेट्ठको वसभो, वजसतजेट्ठको वा उसभो, वजसहस्सजेट्ठको वसभो, सब्बगवसेट्ठो सब्बपरिस्सयसहो सेतो पासादिको महाभारवहो असनिसतसद्देहिपि असम्पकम्पियो निसभो, सो इध उसभोति अधिप्पेतो। इदम्पि हि तस्स परियायवचनं। उसभस्स इदन्ति **आसभं। ठान**न्ति चतूहि पादेहि पथविं उप्पीळेत्वा अवट्ठानं (म॰ नि॰ १.१५०)। इदं पन आसभं वियाति **आसभं**। यथेव हि निसभसङ्खातो उसभो उसभबलेन समन्नागतो चतूहि पादेहि पथविं उप्पीळेत्वा

अचलट्ठानेन तिट्ठति, एवं तथागतोपि दसहि तथागतबलेहि समन्नागतो चतूहि वेसारज्जपादेहि अट्ठपरिसपथविं उप्पीळेत्वा सदेवके लोके केनचि पच्चत्थिकेन पच्चामित्तेन अकम्पियो अचलट्ठानेन तिट्ठति। एवं तिट्ठमानो च तं आसभं ठानं पटिजानाति उपगच्छति न पच्चक्खाति, अत्तनि आरोपेति। तेन वुत्तं ''आसभं ठानं पटिजानाती''ति।

परिसासूति ''अट्ठ खो इमा, सारिपुत्त, परिसा। कतमा अट्ठ? खत्तियपरिसा ब्राह्मणपरिसा गहपतिपरिसा समणपरिसा चातुमहाराजिकपरिसा तावतिंसपरिसा मारपरिसा ब्रह्मपरिसा''ति, इमासु अट्ठसु परिसासु। **सीहनादं नदती**ति सेट्ठनादं अभीतनादं नदति, सीहनादसदिसं वा नादं नदति। अयमत्थो सीहनादसुत्तेन दीपेतब्बो। यथा वा सीहो सहनतो चेव हननतो च सीहोति वुच्चति, एवं तथागतो लोकधम्मानं सहनतो परप्पवादानञ्च हननतो सीहोति वुच्चति। एवं वुत्तस्स सीहस्स नादं सीहनादं। तत्थ यथा सीहो सीहबलेन समन्नागतो सब्बत्थ विसारदो विगतलोमहंसो सीहनादं नदति, एवं तथागतसीहोपि तथागतबलेहि समन्नागतो अट्ठसु परिसासु विसारदो विगतलोमहंसो, ''इति रूप''न्तिआदिना नयेन नानाविधदेसनाविलाससम्पन्नं सीहनादं नदति। तेन वुत्तं ''परिसासु सीहनादं नदती''ति।

ब्रह्मचक्कं पवत्तेतीति एत्थ **ब्रह्म**न्ति सेट्ठं उत्तमं, विसुद्धस्स धम्मचक्कस्सेतं अधिवचनं। तं पन धम्मचक्कं दुविधं होति पटिवेधञाणञ्च देसनाञाणञ्च। तत्थ पञ्ञापभावितं अत्तनो अरियफलावहं पटिवेधञाणं, करुणापभावितं सावकानं अरियफलावहं देसनाञाणं। तत्थ पटिवेधञाणं उप्पज्जमानं उप्पन्नन्ति दुविधं। तञ्हि अभिनिक्खमनतो पट्ठाय याव अरहत्तमग्गा उप्पज्जमानं, फलक्खणे उप्पन्नं नाम। तुसितभवनतो वा याव महाबोधिपल्लङ्के अरहत्तमग्गा उप्पज्जमानं, फलक्खणे उप्पन्नं नाम। दीपङ्करतो वा पट्ठाय याव अरहत्तमग्गा उप्पज्जमानं, फलक्खणे उप्पन्नं नाम। देसनाञाणम्पि पवत्तमानं पवत्तन्ति दुविधं। तञ्हि याव अञ्ञासिकोण्डञ्ञस्स सोतापत्तिमग्गा पवत्तमानं, फलक्खणे पवत्तं नाम। तेसु पटिवेधञाणं लोकुत्तरं, देसनाञाणं लोकियं। उभयम्पि पनेतं अञ्ञेहि असाधारणं बुद्धानंयेव ओरसञाणं।

इदानि यं इमिना ञाणेन समन्नागतो सीहनादं नदति, तं दस्सेतुं **इति रूप**न्तिआदिमाह। तत्थ **इति रूप**न्ति इदं रूपं एत्तकं रूपं, इतो उद्धं रूपं नत्थीति रुप्पनसभावञ्चेव भूतुपादायभेदञ्च आदिं कत्वा लक्खणरसपच्चुपट्ठानपदट्ठानवसेन अनवसेसरूपपरिग्गहो वुत्तो। **इति रूपस्स समुदयो**ति इमिना एवं परिग्गहितस्स रूपस्स समुदयो वुत्तो। तत्थ **इती**ति एवं समुदयो होतीति अत्थो। तस्स वित्थारो ''अविज्जासमुदया रूपसमुदयो तण्हासमुदया, कम्मसमुदया आहारसमुदया रूपसमुदयोति निब्बत्तिलक्खणं पस्सन्तोपि रूपक्खन्धस्स उदयं पस्सती''ति (पटि० म० १.५०) एवं वेदितब्बो। अत्थङ्गमेपि ''अविज्जानिरोधा रूपनिरोधो...पे०... विपरिणामलक्खणं पस्सन्तोपि रूपक्खन्धस्स निरोधं पस्सती''ति अयं वित्थारो।

इति वेदनातिआदीसुपि अयं वेदना एत्तका वेदना, इतो उद्धं वेदना नत्थि, अयं सञ्ञा, इमे सङ्खारा, इदं विञ्ञाणं एत्तकं विञ्ञाणं, इतो उद्धं विञ्ञाणं नत्थीति वेदयितसञ्जाननअभिसङ्खरणविजाननसभावञ्चेव सुखादिरूपसञ्ञादिफस्सादिचक्खुविञ्ञाणादिभेदञ्च आदिं कत्वा लक्खणरसपच्चुपट्ठानपदट्ठानवसेन अनवसेसवेदनासञ्ञासङ्खारविञ्ञाणपरिग्गहो वुत्तो। **इति वेदनाय समुदयो**तिआदीहि पन एवं परिग्गहितानं वेदनासञ्ञासङ्खारविञ्ञाणानं समुदयो वुत्तो। तत्रापि **इती**ति एवं समुदयो होतीति अत्थो। तेसम्पि वित्थारो ''अविज्जासमुदया वेदनासमुदयो''ति (पटि० म० १.५०) रूपे वुत्तनयेनेव वेदितब्बो। अयं पन विसेसो – तीसु खन्धेसु ''आहारसमुदया''ति अवत्वा ''फस्ससमुदया''ति वत्तब्बं, विञ्ञाणक्खन्धे ''नामरूपसमुदया''ति। अत्थङ्गमपदम्पि तेसंयेव वसेन योजेतब्बं। अयमेत्थ सङ्खेपो। वित्थारतो पन उदयब्बयविनिच्छयो सब्बाकारपरिपूरो विसुद्धिमग्गे वुत्तो।

इमस्मिं सति इदं होतीति अयम्पि अपरो सीहनादो। तस्सत्थो – इमस्मिं अविज्जादिके पच्चये सति इदं सङ्खारादिकं

फलं होति। **इमस्सुप्पादा इदं उप्पज्जती**ति इमस्स अविज्जादिकस्स पच्चयस्स उप्पादा इदं सङ्खारादिकं फलं उप्पज्जति। **इमस्मिं असति इदं न होती**ति इमस्मिं अविज्जादिके पच्चये असति इदं सङ्खारादिकं फलं न होति। **इमस्स निरोधा इदं निरुज्झती**ति इमस्स अविज्जादिकस्स पच्चयस्स निरोधा इदं सङ्खारादिकं फलं निरुज्झति। इदानि यथा तं होति चेव निरुज्झति च, तं वित्थारतो दस्सेतुं **यदिदं अविज्जापच्चया सङ्खारा**तिआदिमाह।

एवं स्वाक्खातोति एवं पञ्चक्खन्धविभजनादिवसेन सुट्ठु अक्खातो कथितो। **धम्मो**ति पञ्चक्खन्धपच्चयाकारधम्मो। **उत्तानो**ति अनिकुज्जितो। **विवटो**ति विवरित्वा ठपितो। **पकासितो**ति दीपितो जोतितो। **छिन्नपिलोतिको**ति पिलोतिका वुच्चति छिन्नं भिन्नं तत्थ तत्थ सिब्बितगण्ठितं जिण्णवत्थं, तं यस्स नत्थीति अट्ठहत्थं नवहत्थं वा अहतसाटकं निवत्थो, सो छिन्नपिलोतिको नाम। अयम्पि धम्मो तादिसो। न हेत्थ कोहञ्ञादिवसेन छिन्नभिन्नसिब्बितगण्ठितभावो अत्थि। अपिच खुद्दकसाटकोपि पिलोतिकाति वुच्चति, सा यस्स नत्थि, अट्ठनवहत्थो महापटो अत्थि, सोपि छिन्नपिलोतिको, अपगतपिलोतिकोति अत्थो। तादिसो अयं धम्मो। यथा हि चतुहत्थं साटकं गहेत्वा परिग्गहणं करोन्तो पुरिसो इतो चितो च अञ्छन्तो किलमति, एवं बाहिरकसमये पब्बजिता अत्तनो परित्तकं धम्मं ''एवं सति एवं भविस्सती''ति कप्पेत्वा कप्पेत्वा वड्ढेन्ता किलमन्ति। यथा पन अट्ठहत्थनवहत्थेन परिग्गहणं करोन्तो यथारुचि पारुपति न किलमति, नत्थि तत्थ अञ्छित्वा वड्ढनकिच्चं; एवं इमस्मिम्पि धम्मे कप्पेत्वा कप्पेत्वा विभजनकिच्चं नत्थि, तेहि तेहि कारणेहि मयाव अयं धम्मो सुविभत्तो सुवित्थारितोति इदम्पि सन्धाय ''छिन्नपिलोतिको''ति आह। अपिच कचवरोपि पिलोतिकाति वुच्चति, इमस्मिञ्च सासने समणकचवरं नाम पतिट्ठातुं न लभति। तेनेवाह –

''कारण्डवं निद्धमथ, कसम्बुं अपकस्सथ।
ततो पलापे वाहेथ, अस्समणे समणमानिने॥

''निद्धमित्वान पापिच्छे, पापआचारगोचरे।
सुद्धा सुद्धेहि संवासं, कप्पयव्हो पतिस्सता।
ततो समग्गा निपका, दुक्खस्सन्तं करिस्सथा''ति॥ (अ॰ नि॰ ८.१०)।

इति समणकचवरस्स छिन्नत्तापि अयं धम्मो छिन्नपिलोतिको नाम होति।

अलमेवाति युत्तमेव। **सद्धापब्बजितेना**ति सद्धाय पब्बजितेन। **कुलपुत्तेना**ति द्वे कुलपुत्ता आचारकुलपुत्तो जातिकुलपुत्तो च। तत्थ यो यतो कुतोचि कुला पब्बजित्वा सीलादयो पञ्च धम्मक्खन्धे पूरेति, अयं **आचारकुलपुत्तो** नाम। यो पन यसकुलपुत्तादयो विय जातिसम्पन्नकुला पब्बजितो, अयं **जातिकुलपुत्तो** नाम। तेसु इध आचारकुलपुत्तो अधिप्पेतो। सचे पन जातिकुलपुत्तो आचारवा होति, अयं उत्तमोयेव। एवरूपेन कुलपुत्तेन। **वीरियं आरभितु**न्ति चतुरङ्गसमन्नागतं वीरियं कातुं। इदानिस्स चतुरङ्गं दस्सेन्तो **कामं तचो चा**तिआदिमाह। एत्थ हि तचो एकं अङ्गं, न्हारु एकं, अट्ठि एकं, मंसलोहितं एकन्ति। इदञ्च पन चतुरङ्गसमन्नागतं वीरियं अधिट्ठहन्तेन नवसु ठानेसु समाधातब्बं पुरेभत्ते पच्छाभत्ते पुरिमयामे मज्झिमयामे पच्छिमयामे गमने ठाने निसज्जाय सयनेति।

दुक्खं, भिक्खवे, कुसीतो विहरतीति इमस्मिं सासने यो कुसीतो पुग्गलो, सो दुक्खं विहरति। बाहिरसमये पन यो कुसीतो, सो सुखं विहरति। **वोकिण्णो**ति मिस्सीभूतो। **सदत्थ**न्ति सोभनं वा अत्थं सकं वा अत्थं, उभयेनापि अरहत्तमेव अधिप्पेतं। **परिहापेती**ति हापेति न पापुणाति। कुसीतपुग्गलस्स हि छ द्वारानि अगुत्तानि होन्ति, तीणि कम्मानि

अपरिसुद्धानि, आजीवट्ठमकं सीलं अपरियोदातं, भिन्नाजीवो कुलूपको होति। सो सब्रह्मचारीनं अक्खिम्हि पतितरजं विय उपघातकरो हुत्वा दुक्खं विहरति, पीठमद्दनो चेव होति लण्डपूरको च, सत्थु अज्झासयं गहेतुं न सक्कोति, दुल्लभं खणं विराधेति, तेन भुत्तो रट्ठपिण्डोपि न महप्फलो होति।

आरद्धवीरियो च खो, भिक्खवेति आरद्धवीरियो पुग्गलो इमस्मिंयेव सासने सुखं विहरति। बाहिरसमये पन यो आरद्धवीरियो, सो दुक्खं विहरति। **पविवित्तो**ति विवित्तो वियुत्तो हुत्वा। **सदत्थं परिपूरेती**ति अरहत्तं पापुणाति। आरद्धवीरियस्स हि छ द्वारानि सुगुत्तानि होन्ति, तीणि कम्मानि परिसुद्धानि, आजीवट्ठमकं सीलं परियोदातं सब्रह्मचारीनं अक्खिम्हि सुसीतलञ्जनं विय धातुगतचन्दनं विय च मनापो हुत्वा सुखं विहरति, सत्थु अज्झासयं गहेतुं सक्कोति। सत्था हि –

''चिरं जीव महावीर, कप्पं तिट्ठ महामुनी''ति –

एवं गोतमिया वन्दितो, ''न खो, गोतमि, तथागता एवं वन्दितब्बा''ति पटिक्खिपित्वा ताय याचितो वन्दितब्बाकारं आचिक्खन्तो एवमाह –

''आरद्धवीरिये पहितत्ते, निच्चं दळ्हपरक्कमे।
समग्गे सावके पस्स, एसा बुद्धान वन्दना''ति॥ (अप॰ थेरी २.२.१७१)।

एवं आरद्धवीरियो सत्थु अज्झासयं गहेतुं सक्कोति, दुल्लभं खणं न विराधेति। तस्स हि बुद्धुप्पादो धम्मदेसना सङ्घसुप्पटिपत्ति सफला होति सउद्रया, रट्ठपिण्डोपि तेन भुत्तो महप्फलो होति।

हीनेन अग्गस्साति हीनाय सद्धाय हीनेन वीरियेन हीनाय सतिया हीनेन समाधिना हीनाय पञ्ञाय अग्गसङ्खातस्स अरहत्तस्स पत्ति नाम न होति। **अग्गेन च खो**ति अग्गेहि सद्धादीहि अग्गस्स अरहत्तस्स पत्ति होति। **मण्डपेय्य**न्ति पसन्नट्ठेन मण्डं, पातब्बट्ठेन पेय्यं। यञ्हि पिवित्वा अन्तरवीथियं पतितो विसञ्ञी अत्तनो साटकादीनम्पि अस्सामिको होति, तं पसन्नम्पि न पातब्बं, मय्हं पन सासनं एवं पसन्नञ्च पातब्बञ्चाति दस्सेन्तो ''मण्डपेय्य''न्ति आह।

तत्थ तिविधो मण्डो – देसनामण्डो, पटिग्गहमण्डो, ब्रह्मचरियमण्डोति। कतमो देसनामण्डो? चतुन्नं अरियसच्चानं आचिक्खना देसना पञ्ञापना पट्ठपना विवरणा विभजना उत्तानीकम्मं, चतुन्नं सतिपट्ठानानं…पे॰… अरियस्स अट्ठङ्गिकस्स मग्गस्स आचिक्खना…पे॰… उत्तानीकम्मं, अयं **देसनामण्डो**। कतमो पटिग्गहमण्डो? भिक्खू भिक्खुनियो उपासका उपासिकायो देवा मनुस्सा ये वा पनञ्ञेपि केचि विञ्ञातारो, अयं **पटिग्गहमण्डो**। कतमो ब्रह्मचरियमण्डो? अयमेव अरियो अट्ठङ्गिको मग्गो, सेय्यथिदं – सम्मादिट्ठि…पे॰… सम्मासमाधि, अयं **ब्रह्मचरियमण्डो**। अपिच अधिमोक्खमण्डो सद्धिन्द्रियं, अस्सद्धियं कसटो, अस्सद्धियं कसटं छड्डेत्वा सद्धिन्द्रियस्स अधिमोक्खमण्डं पिवतीति मण्डपेय्यन्तिआदिनापि (पटि॰ म॰ १.२३८) नयेनेत्थ अत्थो वेदितब्बो। **सत्था सम्मुखीभूतो**ति इदमेत्थ कारणवचनं। यस्मा सत्था सम्मुखीभूतो, तस्मा वीरियसम्पयोगं कत्वा पिवथ एतं मण्डं। बाहिरकञ्हि भेसज्जमण्डम्पि वेज्जस्स असम्मुखा पिवन्तानं पमाणं वा उग्गमनं वा निग्गमनं वा न जानामाति आसङ्का होति। वेज्जसम्मुखा पन ''वेज्जो जानिस्सती''ति निरासङ्का पिवन्ति। एवमेव अम्हाकं धम्मस्सामि सत्था सम्मुखीभूतोति वीरियं कत्वा पिवथाति मण्डपाने नेसं नियोजेन्तो **तस्मातिह, भिक्खवे**तिआदिमाह। तत्थ **सफला**ति सानिसंसा। **सउद्रया**ति सवड्ढि। इदानि नियोजनानुरूपं सिक्खितब्बतं निद्दिसन्तो

अत्तत्थं वा हि, भिक्खवेतिआदिमाह। तत्थ **अत्तत्थ**न्ति अत्तनो अत्थभूतं अरहत्तं। **अप्पमादेन सम्पादेतु**न्ति अप्पमादेन सब्बकिच्चानि कातुं। **परत्थ**न्ति पच्चयदायकानं महप्फलानिसंसं। सेसं सब्बत्थ उत्तानमेवाति। दुतियं।

३. उपनिससुत्तवण्णना

२३. ततिये ''जानतो अह''न्तिआदीसु **जानतो**ति जानन्तस्स। **पस्सतो**ति पस्सन्तस्स। द्वेपि पदानि एकत्थानि, ब्यञ्जनमेव नानं। एवं सन्तेपि ''जानतो''ति ञाणलक्खणं उपादाय पुग्गलं निद्दिसति। जाननलक्खणञ्हि ञाणं। ''पस्सतो''ति ञाणप्पभावं उपादाय। पस्सनप्पभावञ्हि ञाणं, ञाणसमङ्गीपुग्गलो चक्खुमा विय चक्खुना रूपानि, ञाणेन विवटे धम्मे पस्सति। **आसवानं खय**न्ति एत्थ आसवानं पहानं असमुप्पादो खीणाकारो नत्थिभावोति अयम्पि आसवक्खयोति वुच्चति, भङ्गोपि मग्गफलनिब्बानानिपि। ''आसवानं खया अनासवं चेतोविमुत्ति''न्तिआदीसु (म॰ नि॰ १.४३८; विभ॰ ८३१) हि खीणाकारो आसवक्खयोति वुच्चति। ''यो आसवानं खयो वयो भेदो परिभेदो अनिच्चता अन्तरधान''न्ति (विभ॰ ३५४) एत्थ भङ्गो।

> ''सेक्खस्स सिक्खमानस्स, उजुमग्गानुसारिनो।
> खयस्मिं पठमं ञाणं, ततो अञ्ञा अनन्तरा''ति॥ (इतिवु॰ ६२)। –

एत्थ मग्गो। सो हि आसवे खेपेन्तो वूपसमेन्तो उप्पज्जति, तस्मा आसवानं खयोति वुत्तो। ''आसवानं खया समणो होती''ति एत्थ फलं। तञ्हि आसवानं खीणन्ते उप्पज्जति, तस्मा आसवानं खयोति वुत्तं।

> ''आसवा तस्स वड्ढन्ति, आरा सो आसवक्खया''ति। (ध॰ प॰ २५३) –

एत्थ निब्बानं। तञ्हि आगम्म आसवा खीयन्ति, तस्मा आसवानं खयोति वुत्तं। इध पन मग्गफलानि अधिप्पेतानि। **नो अजानतो नो अपस्सतो**ति यो पन न जानाति न पस्सति, तस्स नो वदामीति अत्थो। एतेन ये अजानतो अपस्सतोपि संसारादीहियेव सुद्धिं वदन्ति, ते पटिक्खित्ता होन्ति। पुरिमेन पदद्वयेन उपायो वुत्तो, इमिना अनुपायं पटिसेधेति।

इदानि यं जानतो आसवानं खयो होति, तं दस्सेतुकामो **किञ्च, भिक्खवे, जानतो**ति पुच्छं आरभि। तत्थ जानना बहुविधा। दब्बजातिको एव हि कोचि भिक्खु छत्तं कातुं जानाति, कोचि चीवरादीनं अञ्ञतरं, तस्स ईदिसानि कम्मानि वत्तसीसे ठत्वा करोन्तस्स सा जानना सग्गमग्गफलानं पदट्ठानं न होतीति न वत्तब्बं। यो पन सासने पब्बजित्वा वेज्जकम्मादीनि कातुं जानाति, तस्सेवं जानतो आसवा वड्ढन्तियेव। तस्मा यं जानतो पस्सतो च आसवानं खयो होति, तदेव दस्सेन्तो **इति रूप**न्तिआदिमाह। **एवं खो, भिक्खवे, जानतो**ति एवं पञ्चन्नं खन्धानं उदयब्बयं जानन्तस्स। **आसवानं खयो होती**ति आसवानं खयन्ते जातत्ता ''आसवानं खयो''ति लद्धनामं अरहत्तं होति।

एवं अरहत्तनिकूटेन देसनं निट्ठपेत्वा इदानि खीणासवस्स आगमनीयं पुब्बभागपटिपदं दस्सेतुं **यम्पिस्स तं, भिक्खवे**तिआदिमाह। तत्थ **खयस्मिं खयेञाण**न्ति आसवक्खयसङ्खाते अरहत्तफले पटिलद्धे सति पच्चवेक्खणञाणं। तञ्हि अरहत्तफलसङ्खाते खयस्मिं पठमवारं उप्पन्ने पच्छा उप्पन्नत्ता खयेञाणन्ति वुच्चति। **सउपनिस**न्ति सकारणं सप्पच्चयं। **विमुत्ती**ति अरहत्तफलविमुत्ति। सा हिस्स उपनिस्सयपच्चयेन पच्चयो होति। एवं इतो परेसुपि लब्भमानवसेन पच्चयभावो वेदितब्बो।

विरागोति मग्गो। सो हि किलेसे विराजेन्तो खेपेन्तो उप्पन्नो, तस्मा विरागोति वुच्चति। **निब्बिदा**ति निब्बिदाञाणं।

एतेन बलवविपस्सनं दस्सेति। **बलवविपस्सना**ति भयतूपट्ठाने ञाणं आदीनवानुपस्सने ञाणं मुञ्चितुकम्यताञाणं सङ्खारुपेक्खाञाणन्ति चतुन्नं ञाणानं अधिवचनं। **यथाभूतञाणदस्सन**न्ति यथासभावजाननसङ्खातं दस्सनं। एतेन तरुणविपस्सनं दस्सेति। तरुणविपस्सना हि बलवविपस्सनाय पच्चयो होति। **तरुणविपस्सना**ति सङ्खारपरिच्छेदे ञाणं कङ्खावितरणे ञाणं सम्मसने ञाणं मग्गामग्गे ञाणन्ति चतुन्नं ञाणानं अधिवचनं। **समाधी**ति पादकज्झानसमाधि। सो हि तरुणविपस्सनाय पच्चयो होति। **सुख**न्ति अप्पनाय पुब्बभागसुखं। तञ्हि पादकज्झानस्स पच्चयो होति। **पस्सद्धी**ति दरथपटिप्पस्सद्धि। सा हि अप्पनापुब्बभागस्स सुखस्स पच्चयो होति। **पीती**ति बलवपीति। सा हि दरथपटिप्पस्सद्धिया पच्चयो होति। **पामोज्ज**न्ति दुब्बलपीति। सा हि बलवपीतिया पच्चयो होति। **सद्धा**ति अपरापरं उप्पज्जनसद्धा। सा हि दुब्बलपीतिया पच्चयो होति। **दुक्ख**न्ति वट्टदुक्खं। तञ्हि अपरापरसद्धाय पच्चयो होति। **जाती**ति सविकारा खन्धजाति। सा हि वट्टदुक्खस्स पच्चयो होति। **भवो**ति कम्मभवो। (सो हि सविकाराय जातिया पच्चयो होति।) एतेनुपायेन सेसपदानिपि वेदितब्बानि।

थुल्लफुसितकेति महाफुसितके। **पब्बतकन्दरपदरसाखा**ति एत्थ **कन्दरं** नाम 'क'न्तिलद्धनामेन उदकेन दारितो उदकभिन्नो पब्बतपदेसो, यो ''नितम्बो''तिपि ''नदीकुञ्जो''तिपि वुच्चति। **पदरं** नाम अट्ठमासे देवे अवस्सन्ते फलितो भूमिप्पदेसो। **साखा**ति कुसुम्भगामिनियो खुद्दकमातिकायो। **कुसोब्भा**ति खुद्दकआवाटा। **महासोब्भा**ति महाआवाटा। **कुन्नदियो**ति खुद्दकनदियो। **महानदियो**ति गङ्गायमुनादिका महासरिता। **एवमेव खो**, **भिक्खवे, अविज्जूपनिसा सङ्खारा**तिआदीसु अविज्जा पब्बतोति दट्ठब्बा। अभिसङ्खारा मेघोति, विञ्ञाणादिवट्टं कन्दरादयोति, विमुत्ति सागरोति।

यथा पब्बतमत्थके देवो वस्सित्वा पब्बतकन्दरादीनि पूरेन्तो अनुपुब्बेन महासमुद्दं सागरं पूरेति, एवं अविज्जापब्बतमत्थके ताव अभिसङ्खारमेघस्स वस्सनं वेदितब्बं। अस्सुतवा हि बालपुथुज्जनो अविज्जाय अञ्ञाणी हुत्वा तण्हाय अभिलासं कत्वा कुसलाकुसलकम्मं आयूहति, तं कुसलाकुसलकम्मं पटिसन्धिविञ्ञाणस्स पच्चयो होति, पटिसन्धिविञ्ञाणादीनि नामरूपादीनं। इति पब्बतमत्थके वुट्ठदेवस्स कन्दरादयो पूरेत्वा महासमुद्दं आहच्च ठितकालो विय अविज्जापब्बतमत्थके वुट्ठस्स अभिसङ्खारमेघस्स परम्परपच्चयताय अनुपुब्बेन विञ्ञाणादिवट्टं पूरेत्वा ठितकालो। बुद्धवचनं पन पाळियं अगहितम्पि ''इध तथागतो लोके उप्पज्जति, अगारस्मा अनगारियं पब्बजती''ति इमाय पाळिया वसेन गहितमेवाति वेदितब्बं। या हि तस्स कुलगेहे निब्बत्ति, सा कम्मभवपच्चया सविकारा जाति नाम। सो बुद्धानं वा बुद्धसावकानं वा सम्मुखीभावं आगम्म वट्टदोसदीपकं लक्खणाहटं धम्मकथं सुत्वा वट्टवसेन पीळितो होति, एवमस्स सविकारा खन्धजाति वट्टदुक्खस्स पच्चयो होति। सो वट्टदुक्खेन पीळितो अपरापरं सद्धं जनेत्वा अगारस्मा अनगारियं पब्बजति, एवमस्स वट्टदुक्खं अपरापरसद्धाय पच्चयो होति। सो पब्बज्जामत्तेनेव असन्तुट्ठो ऊनपञ्चवस्सकाले निस्सयं गहेत्वा वत्तपटिपत्तिं पूरेन्तो द्वेमातिका पगुणं कत्वा कम्माकम्मं उग्गहेत्वा याव अरहत्ता निज्जटं कत्वा कम्मट्ठानं गहेत्वा अरञ्ञे वसन्तो पथवीकसिणादीसु कम्मं आरभति, तस्स कम्मट्ठानं निस्साय दुब्बलपीति उप्पज्जति। तदस्स सद्धूपनिसं पामोज्जं, तं बलवपीतिया पच्चयो होति। बलवपीति दरथपटिप्पस्सद्धिया, सा अप्पनापुब्बभागसुखस्स, तं सुखं पादकज्झानसमाधिस्स। सो समाधिना चित्तकल्लतं जनेत्वा तरुणविपस्सनाय कम्मं करोति। इच्चस्स पादकज्झानसमाधि तरुणविपस्सनाय पच्चयो होति, तरुणविपस्सना बलवविपस्सनाय, बलवविपस्सना मग्गस्स, मग्गो फलविमुत्तिया, फलविमुत्ति पच्चवेक्खणञाणस्साति। एवं देवस्स अनुपुब्बेन सागरं पूरेत्वा ठितकालो विय खीणासवस्स विमुत्तिसागरं पूरेत्वा ठितकालो वेदितब्बोति। ततियं।

४. अञ्ञतित्थियसुत्तवण्णना

२४. चतुत्थे **पाविसी**ति पविट्ठो। सो च न ताव पविट्ठो, ''पविसिस्सामी''ति निक्खन्तत्ता पन एवं वुत्तो। यथा किं? यथा ''गामं गमिस्सामी''ति निक्खन्तपुरिसो तं गामं अप्पत्तोपि ''कहं इत्थन्नामो''ति वुत्ते ''गामं गतो''ति वुच्चति, एवं। **अतिप्पगो**ति तदा किर थेरस्स अतिप्पगोयेव निक्खन्तदिवसो अहोसि, अतिप्पगोयेव निक्खन्तभिक्खू बोधियङ्गणे चेतियङ्गणे निवासनपारुपनट्ठानेति इमेसु ठानेसु याव भिक्खाचारवेला होति, ताव पपञ्चं करोन्ति। थेरस्स पन ''याव भिक्खाचारवेला होति, ताव परिब्बाजकेहि सद्धिं एकद्वेकथावारे करिस्सामी''ति चिन्तयतो **यंनूनाह**न्ति एतदहोसि। **परिब्बाजकानं आरामो**ति सो किर आरामो दक्खिणद्वारस्स च वेळुवनस्स च अन्तरा अहोसि। **इधा**ति इमेसु चतूसु वादेसु। **किंवादी किमक्खायी**ति किं वदति किं आचिक्खति, किं एत्थ समणस्स गोतमस्स दस्सनन्ति पुच्छन्ति। **धम्मस्स चानुधम्मं ब्याकरेय्यामा**ति, भोता गोतमेन यं वुत्तं कारणं, तस्स अनुकारणं कथेय्याम। **सहधम्मिको वादानुपातो**ति परेहि वुत्तकारणेन सकारणो हुत्वा समणस्स गोतमस्स वादानुपातो वादप्पवत्ति विञ्ञूहि गरहितब्बं कारणं कोचि अप्पमत्तकोपि कथं नागच्छेय्य? इदं वुत्तं होति — कथं सब्बाकारेनपि समणस्स गोतमस्स वादे गारय्हं कारणं न भवेय्याति?

इति वदन्ति फस्सपच्चया दुक्खन्ति एवं वदन्तोति अत्थो। **तत्रा**ति तेसु चतूसु वादेसु। **ते वत अञ्ञत्र फस्सा**ति इदं ''तदपि फस्सपच्चया''ति पटिञ्ञाय साधकवचनं। यस्मा हि न विना फस्सेन दुक्खपटिसंवेदना अत्थि, तस्मा जानितब्बमेतं यथा ''तदपि फस्सपच्चया''ति अयमेत्थ अधिप्पायो।

साधु, साधु, आनन्दाति अयं साधुकारो सारिपुत्तत्थेरस्स दिन्नो, आनन्दत्थेरेन पन सद्धिं भगवा आमन्तेसि। **एकमिदाह**न्ति एत्थ **इधा**ति निपातमत्तं, एकं समयन्ति अत्थो। इदं वचनं ''न केवलं सारिपुत्तोव राजगहं पविट्ठो, अहम्पि पाविसिं। न केवलञ्च तस्सेवायं वितक्को उप्पन्नो, मय्हम्पि उप्पज्जि। न केवलञ्च तस्सेव सा तित्थियेहि सद्धिं कथा जाता, मय्हम्पि जातपुब्बा''ति दस्सनत्थं वुत्तं।

अच्छरियं अब्भुतन्ति उभयम्पेतं विम्हयदीपनमेव। वचनत्थो पनेत्थ अच्छरं पहरितुं युत्तन्ति अच्छरियं। अभूतपुब्बं भूतन्ति अब्भुतं। **एकेन पदेना**ति ''फस्सपच्चया दुक्ख''न्ति इमिना एकेन पदेन। एतेन हि सब्बवादानं पटिक्खेपत्थो वुत्तो। **एसेवत्थो**ति एसोयेव फस्सपच्चया दुक्खन्ति पटिच्चसमुप्पादत्थो। **तञ्ञेवेत्थ पटिभातू**ति तञ्ञेवेत्थ उपट्ठातु। इदानि थेरो जरामरणादिकाय पटिच्चसमुप्पादकथाय तं अत्थगम्भीरञ्चेव गम्भीरावभासञ्च करोन्तो **सचे मं, भन्ते**तिआदिं वत्वा यंमूलका कथा उप्पन्ना, तदेव पदं गहेत्वा विवट्टं दस्सेन्तो **छन्नंत्वेवा**तिआदिमाह। सेसं उत्तानमेवाति। चतुत्थं।

५. भूमिजसुत्तवण्णना

२५-२६. पञ्चमे **भूमिजो**ति तस्स थेरस्स नामं। सेसमिधापि पुरिमसुत्ते वुत्तनयेनेव वेदितब्बं। अयं पन विसेसो — यस्मा इदं सुखदुक्खं न केवलं फस्सपच्चया उप्पज्जति, कायेनपि करियमानं करीयति, वाचायपि मनसापि, अत्तनापि करियमानं करीयति, परेनपि करियमानं करीयति, सम्पजानेनपि करियमानं करीयति, असम्पजानेनपि, तस्मा तस्स अपरम्पि पच्चयविसेसं दस्सेतुं **काये वा हानन्द, सती**तिआदिमाह। **कायसञ्चेतनाहेतू**ति कायद्वारे उप्पन्नचेतनाहेतु। वचीसञ्चेतनामनोसञ्चेतनासुपि एसेव नयो। एत्थ च कायद्वारे कामावचरकुसलाकुसलवसेन वीसति चेतना लब्भन्ति, तथा वचीद्वारे। मनोद्वारे नवहि रूपारूपचेतनाहि सद्धिं एकूनतिंसाति तीसु द्वारेसु एकूनसत्तति चेतना होन्ति, तप्पच्चयं विपाकसुखदुक्खं दस्सितं। **अविज्जापच्चया चा**ति इदं तापि चेतना अविज्जापच्चया होन्तीति दस्सनत्थं वुत्तं। यस्मा पन तं यथावुत्तचेतनाभेदं कायसङ्खारञ्चेव वचीसङ्खारञ्च मनोसङ्खारञ्च परेहि अनुस्साहितो सामं असङ्खारिकचित्तेन करोति, परेहि कारियमानो ससङ्खारिकचित्तेनापि करोति, ''इदं नाम कम्मं करोति, तस्स एवरूपो नाम विपाको भविस्सती''ति, एवं

कम्मञ्च विपाकञ्च जानन्तोपि करोति, मातापितूसु चेतियवन्दनादीनि करोन्तेसु अनुकरोन्ता दारका विय केवलं कम्ममेव जानन्तो ''इमस्स पन कम्मस्स अयं विपाको''ति विपाकं अजानन्तोपि करोति, तस्मा तं दस्सेतुं **सामं वा तं, आनन्द, कायसङ्खारं अभिसङ्खरोती**तिआदि वुत्तं।

इमेसु, आनन्द, धम्मेसूति ये इमे ''सामं वा तं, आनन्द, कायसङ्खार''न्तिआदीसु चतूसु ठानेसु वुत्ता छसत्तति द्वेसता चेतनाधम्मा, इमेसु धम्मेसु अविज्जा उपनिस्सयकोटिया अनुपतिता। सब्बेपि हि ते ''अविज्जापच्चया सङ्खारा''ति एत्थेव सङ्गहं गच्छन्ति। इदानि विवट्टं दस्सेन्तो **अविज्जाय त्वेवा**तिआदिमाह। **सो कायो न होती**ति यस्मिं काये सति कायसञ्चेतनापच्चयं अज्झत्तं सुखदुक्खं उप्पज्जति, सो कायो न होति। वाचामनेसुपि एसेव नयो। अपिच कायोति चेतनाकायो, वाचापि चेतनावाचा, मनोपि कम्ममनोयेव। द्वारकायो वा कायो। वाचामनेसुपि एसेव नयो। खीणासवो चेतियं वन्दति, धम्मं भणति, कम्मट्ठानं मनसि करोति, कथमस्स कायादयो न होन्तीति? अविपाकत्ता। खीणासवेन हि कतं कम्मं नेव कुसलं होति नाकुसलं। अविपाकं हुत्वा किरियामत्ते तिट्ठति, तेनस्स ते कायादयो न होन्तीति वुत्तं।

खेत्तं तं न होतीतिआदीसुपि विरुहनट्ठेन तं खेत्तं न होति, पतिट्ठानट्ठेन वत्थु न होति, पच्चयट्ठेन आयतनं न होति, कारणट्ठेन अधिकरणं न होति। सञ्चेतनामूलकञ्हि अज्झत्तं सुखदुक्खं उप्पज्जेय्य, सा सञ्चेतना एतेसं विरुहनादीनं अत्थानं अभावेन तस्स सुखदुक्खस्स नेव खेत्तं, न वत्थु न आयतनं, न अधिकरणं होतीति। इमस्मिं सुत्ते वेदनादीसु सुखदुक्खमेव कथितं, तञ्च खो विपाकमेवाति। पञ्चमं।

छट्ठं उपवाणसुत्तं उत्तानमेव। एत्थ पन वट्टदुक्खमेव कथितन्ति। छट्ठं।

७. पच्चयसुत्तवण्णना

२७-२८. सत्तमे पटिपाटिया वुत्तेसु परियोसानपदं गहेत्वा **कतमञ्च, भिक्खवे, जरामरण**न्तिआदि वुत्तं। **एवं पच्चयं पजानाती**ति एवं दुक्खसच्चवसेन पच्चयं जानाति। पच्चयसमुदयादयोपि समुदयसच्चादीनंयेव वसेन वेदितब्बा। **दिट्ठिसम्पन्नो**ति मग्गदिट्ठिया सम्पन्नो। **दस्सनसम्पन्नो**ति तस्सेव वेवचनं। **आगतो इमं सद्धम्म**न्ति मग्गसद्धम्मं आगतो। **पस्सती**ति मग्गसद्धम्ममेव पस्सति। **सेक्खेन ञाणेना**ति मग्गञाणेनेव। **सेक्खाय विज्जाया**ति मग्गविज्जाय एव। **धम्मसोतं समापन्नो**ति मग्गसङ्खातमेव धम्मसोतं समापन्नो। **अरियो**ति पुथुज्जनभूमिं अतिक्कन्तो। **निब्बेधिकपञ्ञो**ति निब्बेधिकपञ्ञाय समन्नागतो। **अमतद्वारं आहच्च तिट्ठती**ति अमतं नाम निब्बानं, तस्स द्वारं अरियमग्गं आहच्च तिट्ठतीति। अट्ठमं उत्तानमेव। सत्तमअट्ठमानि।

९. समणब्राह्मणसुत्तवण्णना

२९-३०. नवमं अक्खरभाणकानं भिक्खूनं अज्झासयेन वुत्तं। ते हि **परी**ति उपसग्गं पक्खिपित्वा वुच्चमाने पटिविज्झितुं सक्कोन्ति। नवमं।

दसमे सब्बं उत्तानमेव। इमेसु द्वीसु सुत्तेसु चतुसच्चपटिवेधोव कथितो। दसमं।

दसबलवग्गो ततियो।

४. कळारखत्तियवग्गो

१. भूतसुत्तवण्णना

३१. कळारखत्तियवग्गस्स पठमे **अजितपञ्हे**ति अजितमाणवेन पुच्छितपञ्हे। **सङ्खातधम्मासे**ति सङ्खातधम्मा वुच्चन्ति ञातधम्मा तुलितधम्मा तीरितधम्मा। **सेक्खा**ति सत्त सेक्खा। **पुथू**ति तेयेव सत्त जने सन्धाय पुथूति वुत्तं। **इधा**ति इमस्मिं सासने। **निपको**ति नेपक्कं वुच्चति पञ्ञा, ताय समन्नागतत्ता निपको, त्वं पण्डितो पब्रूहीति याचति। **इरियन्ति** वुत्तिं आचारं गोचरं विहारं पटिपत्तिं। **मारिसा**ति भगवन्तं आलपति। सेक्खानञ्च सङ्खातधम्मानञ्च खीणासवानञ्च पटिपत्तिं मया पुच्छितो पण्डित, मारिस, मय्हं कथेहीति अयमेत्थ सङ्खेपत्थो।

तुण्ही अहोसीति कस्मा याव ततियं पुट्ठो तुण्ही अहोसि? किं पञ्हे कङ्खति, उदाहु अज्झासयेति? अज्झासये कङ्खति, नो पञ्हे। एवं किरस्स अहोसि – ''सत्था मं सेक्खासेक्खानं आगमनीयपटिपदं कथापेतुकामो; सा च खन्धवसेन धातुवसेन आयतनवसेन पच्चयाकारवसेनाति बहूहि कारणेहि सक्का कथेतुं। कथं कथेन्तो नु खो सत्थु अज्झासयं गहेत्वा कथेतुं सक्खिस्सामी''ति? अथ सत्था चिन्तेसि – ''ठपेत्वा मं अञ्ञो पत्तं आदाय चरन्तो सावको नाम पञ्ञाय सारिपुत्तसमो नत्थि। अयम्पि मया पञ्हं पुट्ठो याव ततियं तुण्ही एव। पञ्हे नु खो कङ्खति, उदाहु अज्झासये''ति। अथ ''अज्झासये''ति ञत्वा पञ्हकथनत्थाय नयं ददमानो **भूतमिदन्ति, सारिपुत्त, पस्ससी**ति आह।

तत्थ **भूत**न्ति जातं निब्बत्तं, खन्धपञ्चकस्सेतं नामं। इति सत्था ''पञ्चक्खन्धवसेन, सारिपुत्त, इमं पञ्हं कथेही''ति थेरस्स नयं देति। सहनयदानेन पन थेरस्स तीरे ठितपुरिसस्स विवटो एकङ्गणो महासमुद्दो विय नयसतेन नयसहस्सेन पञ्हब्याकरणं उपट्ठासि। अथ नं ब्याकरोन्तो **भूतमिदन्ति, भन्ते**तिआदिमाह। तत्थ **भूतमिद**न्ति इदं निब्बत्तं खन्धपञ्चकं। **सम्मप्पञ्ञाय पस्सती**ति सह विपस्सनाय मग्गपञ्ञाय सम्मा पस्सति। **पटिपन्नो होती**ति सीलतो पट्ठाय याव अरहत्तमग्गा निब्बिदादीनं अत्थाय पटिपन्नो होति। **तदाहारसम्भव**न्ति इदं कस्मा आरभि? एतं खन्धपञ्चकं आहारं पटिच्च ठितं, तस्मा तं आहारसम्भवं नाम कत्वा दस्सेतुं इदं आरभि। इति इमिनापि परियायेन सेक्खपटिपदा कथिता होति। **तदाहारनिरोधा**ति तेसं आहारानं निरोधेन। इदं कस्मा आरभि? तञ्हि खन्धपञ्चकं आहारनिरोधा निरुज्झति, तस्मा तं आहारनिरोधसम्भवं नाम कत्वा दस्सेतुं इदं आरभि। इति इमिनापि परियायेन सेक्खस्सेव पटिपदा कथिता। **निब्बिदा**ति आदीनि सब्बानि कारणवचनानीति वेदितब्बानि। **अनुपादा विमुत्तो**ति चतूहि उपादानेहि कञ्चि धम्मं अगहेत्वा विमुत्तो। **साधु साधू**ति इमिना थेरस्स ब्याकरणं सम्पहंसेत्वा सयम्पि तथेव ब्याकरोन्तो पुन ''भूतमिद''न्तिआदिमाहाति। पठमं।

२. कळारसुत्तवण्णना

३२. दुतिये **कळारखत्तियो**ति तस्स थेरस्स नामं। दन्ता पनस्स कळारा विसमसण्ठाना, तस्मा ''कळारो''ति वुच्चति। **हीनायावत्तो**ति हीनस्स गिहिभावस्स अत्थाय निवत्तो। **अस्सासमलत्था**ति अस्सासं अवस्सयं पतिट्ठं न हि नून अलत्थ, तयो मग्गे तीणि च फलानि नून नालत्थाति दीपेति। यदि हि तानि लभेय्य, न सिक्खं पच्चक्खाय हीनायावत्तेय्याति अयं थेरस्स अधिप्पायो। **न ख्वाहं, आवुसो**ति अहं खो, आवुसो, ''अस्सासं पत्तो, न पत्तो''ति न कङ्खामि। थेरस्स हि सावकपारमीञाणं अवस्सयो, तस्मा सो न कङ्खति। **आयतिं पनावुसो**ति इमिना ''आयतिं पटिसन्धि तुम्हाकं उग्घाटिता, न उग्घाटिता''ति अरहत्तप्पत्तिं पुच्छति। **न ख्वाहं, आवुसो, विचिकिच्छामी**ति इमिना थेरो तत्थ विचिकिच्छाभावं दीपेति।

येन भगवा तेनुपसङ्कमीति ''इमं सुतकारणं भगवतो आरोचेस्सामी''ति उपसङ्कमि। **अञ्ञा ब्याकता**ति अरहत्तं ब्याकतं। **खीणा जाती**ति न थेरेन एवं ब्याकता, अयं पन थेरो तुट्ठो पसन्नो एवं पदब्यञ्जनानि आरोपेत्वा आह। **अञ्ञतरं भिक्खुं आमन्तेसी**ति तं सुत्वा सत्था चिन्तेसि – ''सारिपुत्तो धीरो गम्भीरो। न सो केनचि कारणेन एवं ब्याकरिस्सति। संखित्तेन पन पञ्हो ब्याकतो भविस्सति। पक्कोसापेत्वा नं पञ्हं ब्याकरापेस्सामी''ति अञ्ञतरं भिक्खुं आमन्तेसि।

सचे तं सारिपुत्ताति इदं भगवा ''न एस अत्तनो धम्मताय अञ्ञं ब्याकरिस्सति, पञ्हमेतं पुच्छिस्सामि, तं कथेन्तोव अञ्ञं ब्याकरिस्सती''ति अञ्ञं ब्याकरापेतुं एवं पुच्छि। **यंनिदानावुसो, जाती**ति, आवुसो, अयं जाति नाम यंपच्चया, तस्स पच्चयस्स खया खीणस्मिं जातिया पच्चये जातिसङ्खातं फलं खीणन्ति विदितं। इधापि च थेरो पञ्हे अकङ्खित्वा अज्झासये कङ्खति। एवं किरस्स अहोसि – ''अञ्ञा नाम तण्हा खीणा, उपादानं खीणं, भवो खीणो, पच्चयो खीणो, किलेसा खीणातिआदीहि बहूहि कारणेहि सक्का ब्याकातुं, कथं कथेन्तो पन सत्थु अज्झासयं गहेतुं सक्खिस्सामी''ति।

किञ्चापि एवं अज्झासये कङ्खति, पञ्हं पन अट्ठपेत्वाव पच्चयाकारवसेन ब्याकासि। सत्थापि पच्चयाकारवसेनेव ब्याकरापेतुकामो, तस्मा एस ब्याकरोन्तोव अज्झासयं गण्हि। तावदेव ''गहितो मे सत्थु अज्झासयो''ति अञ्ञासि। अथस्स नयसतेन नयसहस्सेन पञ्हब्याकरणं उपट्ठासि। यस्मा पन भगवा उत्तरि पञ्हं पुच्छति, तस्मा तेन तं ब्याकरणं अनुमोदितन्ति वेदितब्बं।

कथं जानतो पन तेति इदं कस्मा आरभि? सविसये सीहनादं नदापेतुं। थेरो किर सूकरनिखातलेणद्वारे दीघनखपरिब्बाजकस्स वेदनापरिग्गहसुत्ते कथियमाने तालवण्टं गहेत्वा सत्थारं बीजयमानो ठितो तिस्सो वेदना परिग्गहेत्वा सावकपारमीञाणं अधिगतो, अयमस्स सविसयो। इमस्मिं सविसये ठितो सीहनादं नदिस्सतीति नं सन्धाय सत्था इदं पञ्हं पुच्छि। **अनिच्चा**ति हुत्वा अभावट्ठेन अनिच्चा। **यदनिच्चं तं दुक्ख**न्ति एत्थ किञ्चापि सुखा वेदना ठितिसुखा विपरिणामदुक्खा, दुक्खा वेदना ठितिदुक्खा विपरिणामसुखा, अदुक्खमसुखा ञाणसुखा अञ्ञाणदुक्खा, विपरिणामकोटिया पन सब्बाव दुक्खा नाम जाता। **विदित**न्ति यस्मा एवं वेदनात्तयं दुक्खन्ति विदितं, तस्मा या तत्थ तण्हा, सा न उपट्ठासीति दस्सेति।

साधु साधूति थेरस्स वेदनापरिच्छेदजानने सम्पहंसनं। थेरो हि वेदना एकाति वा द्वे तिस्सो चतस्सोति वा अवुत्तेपि वुत्तनयेन तासं तिस्सोति परिच्छेदं अञ्ञासि, तेन तं भगवा सम्पहंसन्तो एवमाह। **दुक्खस्मि**न्ति इदं भगवा इमिना अधिप्पायेन आह – ''सारिपुत्त, यं तया 'इमिना कारणेन वेदनासु तण्हा न उपट्ठासी'ति ब्याकतं, तं सुब्याकतं। 'तिस्सो वेदना'ति विभजन्तेन पन ते अतिप्पपञ्चो कतो, तं 'दुक्खस्मि'न्ति ब्याकरोन्तेनपि हि ते सुब्याकतमेव भवेय्य। यंकिञ्चि वेदयितं, तं दुक्खन्ति ञातमत्तेपि हि वेदनासु तण्हा न तिट्ठति''।

कथं विमोक्खाति कतरा विमोक्खा, कतरेन विमोक्खेन तया अञ्ञा ब्याकताति अत्थो? **अज्झत्तं विमोक्खा**ति अज्झत्तविमोक्खेन, अज्झत्तसङ्खारे परिग्गहेत्वा पत्तअरहत्तेनाति अत्थो। तत्थ चतुक्कं वेदितब्बं – अज्झत्तं अभिनिवेसो अज्झत्तं वुट्ठानं, अज्झत्तं अभिनिवेसो बहिद्धा वुट्ठानं, बहिद्धा अभिनिवेसो बहिद्धा वुट्ठानं, बहिद्धा अभिनिवेसो अज्झत्तं वुट्ठानन्ति। अज्झत्तञ्हि अभिनिवेसित्वा बहिद्धाधम्मापि दट्ठब्बायेव, बहिद्धा अभिनिवेसित्वा अज्झत्तधम्मापि। तस्मा कोचि भिक्खु अज्झत्तं सङ्खारेसु ञाणं ओतारेत्वा ते ववत्थपेत्वा बहिद्धा ओतारेति, बहिद्धापि परिग्गहेत्वा पुन अज्झत्तं ओतारेति, तस्स अज्झत्त सङ्खारे सम्मसनकाले मग्गवुट्ठानं होति। इति अज्झत्तं अभिनिवेसो अज्झत्तं वुट्ठानं नाम। कोचि अज्झत्तं सङ्खारेसु ञाणं ओतारेत्वा ते ववत्थपेत्वा बहिद्धा ओतारेति, तस्स बहिद्धा सङ्खारे सम्मसनकाले मग्गवुट्ठानं होति। इति

अज्झत्तं अभिनिवेसो बहिद्धा वुट्ठानं नाम। कोचि बहिद्धा सङ्खारेसु ञाणं ओतारेत्वा, ते ववत्थपेत्वा अज्झत्तं ओतारेति, अज्झत्तम्पि परिग्गहेत्वा पुन बहिद्धा ओतारेति, तस्स बहिद्धा सङ्खारे सम्मसनकाले मग्गवुट्ठानं होति। इति बहिद्धा अभिनिवेसो बहिद्धा वुट्ठानं नाम। कोचि बहिद्धा सङ्खारेसु ञाणं ओतारेत्वा ते ववत्थपेत्वा अज्झत्तं ओतारेति, तस्स अज्झत्तसङ्खारे सम्मसनकाले मग्गवुट्ठानं होति। इति बहिद्धा अभिनिवेसो अज्झत्तं वुट्ठानं नाम। तत्र थेरो ''अज्झत्तसङ्खारे परिग्गहेत्वा तेसं ववत्थानकाले मग्गवुट्ठानेन अरहत्तं पत्तोस्मी''ति दस्सेन्तो **अज्झत्तं विमोक्खा ख्वाहं, आवुसो**ति आह।

सब्बुपादानक्खयाति सब्बेसं चतुन्नम्पि उपादानानं खयेन। **तथा सतो विहरामी**ति तेनाकारेन सतिया समन्नागतो विहरामि। **यथा सतं विहरन्त**न्ति येनाकारेन मं सतिया समन्नागतं विहरन्तं। **आसवा नानुस्सवन्ती**ति चक्खुतो रूपे सवन्ति आसवन्ति सन्दन्ति पवत्तन्तीति एवं छहि द्वारेहि छसु आरम्मणेसु सवनधम्मा कामासवादयो आसवा नानुस्सवन्ति नानुप्पवड्ढन्ति, यथा मे न उप्पज्जन्तीति अत्थो। **अत्तानञ्च नावजानामी**ति अत्तानञ्च न अवजानामि। इमिना ओमानपहानं कथितं। एवञ्हि सति पजानना पसन्ना होति।

समणेनाति बुद्धसमणेन। **तेस्वाहं न कङ्खामी**ति तेसु अहं ''कतरो कामासवो, कतरो भवासवो, कतरो दिट्ठासवो, कतरो अविज्जासवो''ति एवं सरूपभेदतोपि, ''चत्तारो आसवा''ति एवं गणनपरिच्छेदतोपि न कङ्खामि। **ते मे पहीनाति न विचिकिच्छामी**ति ते मय्हं पहीनाति विचिकिच्छं न उप्पादेमि। इदं भगवा ''एवं ब्याकरोन्तेनपि तया सुब्याकतं भवेय्य 'अज्झत्तं विमोक्खा ख्वाहं, आवुसो'तिआदीनि पन ते वदन्तेन अतिप्पपञ्चो कतो''ति दस्सेन्तो आह।

उट्ठायासना विहारं पाविसीति पञ्ञत्तवरबुद्धासनतो उट्ठहित्वा विहारं अन्तोमहागन्धकुटिं पाविसि असम्भिन्नाय एव परिसाय। कस्मा? बुद्धा हि अनिट्ठिताय देसनाय असम्भिन्नाय परिसाय उट्ठायासना गन्धकुटिं पविसन्ता पुग्गलथोमनत्थं वा पविसन्ति धम्मथोमनत्थं वा। तत्थ पुग्गलथोमनत्थं पविसन्तो सत्था एवं चिन्तेसि – ''इमं मया संखित्तेन उद्देसं उद्दिट्ठं वित्थारेन च अविभत्तं धम्मपटिग्गाहका भिक्खू उग्गहेत्वा आनन्दं वा कच्चायनं वा उपसङ्कमित्वा पुच्छिस्सन्ति, ते मय्हं ञाणेन संसन्देत्वा कथेस्सन्ति, ततोपि धम्मपटिग्गाहका पुन मं पुच्छिस्सन्ति। तेसमहं 'सुकथितं, भिक्खवे, आनन्देन, सुकथितं कच्चायनेन, मं चेपि तुम्हे एतमत्थं पुच्छेय्याथ, अहम्पि नं एवमेव ब्याकरेय्य'न्ति एवं ते पुग्गले थोमेस्सामि। ततो तेसु गारवं जनेत्वा भिक्खू उपसङ्कमिस्सन्ति, तेपि भिक्खू अत्थे च धम्मे च नियोजेस्सन्ति, ते तेहि नियोजिता तिस्सो सिक्खा परिपूरेत्वा दुक्खस्सन्तं करिस्सन्ती''ति।

अथ वा पनस्स एवं होति – ''एस मयि पक्कन्ते अत्तनो आनुभावं करिस्सति, अथ नं अहम्पि तथेव थोमेस्सामि, तं मम थोमनं सुत्वा गारवजाता भिक्खू इमं उपसङ्कमितब्बं, वचनञ्चस्स सोतब्बं सद्धातब्बं मञ्ञिस्सन्ति, तं तेसं भविस्सति दीघरत्तं हिताय सुखाया''ति धम्मथोमनत्थं पविसन्तो एवं चिन्तेसि यथा धम्मदायादसुत्ते चिन्तेसि। तत्र हिस्स एवं अहोसि – ''मयि विहारं पविट्ठे आमिसदायादं गरहन्तो धम्मदायादञ्च थोमेन्तो इमिस्संयेव परिसति निसिन्नो सारिपुत्तो धम्मं देसेस्सति, एवं द्विन्नम्पि अम्हाकं एकज्झासयाय मतिया देसिता अयं देसना अग्गा च गरुका च भविस्सति पासाणच्छत्तसदिसा''ति।

इध पन आयस्मन्तं सारिपुत्तं उक्कंसेत्वा पकासेत्वा ठपेतुकामो पुग्गलथोमनत्थं उट्ठायासना विहारं पाविसि। ईदिसेसु ठानेसु भगवा निसिन्नासनेयेव अन्तरहितो चित्तगतिया विहारं पविसतीति वेदितब्बो। यदि हि कायगतिया गच्छेय्य, सब्बा परिसा भगवन्तं परिवारेत्वा गच्छेय्य, सा एकवारं भिन्ना पुन दुस्सन्निपाता भवेय्याति भगवा अदिस्समानेन कायेन चित्तगतिया एव पाविसि।

एवं पविट्ठे पन भगवति भगवतो अधिप्पायानुरूपमेव सीहनादं नदितुकामो **तत्र खो आयस्मा सारिपुत्तो अचिरपक्कन्तस्स भगवतो भिक्खू आमन्तेसि। पुब्बे अप्पटिसंविदित**न्ति इदं नाम पुच्छिस्सतीति पुब्बे मया अविदितं अञ्ञातं। **पठमं पञ्ह**न्ति, ''सचे तं, सारिपुत्त, एवं पुच्छेय्युं कथं जानता पन तया, आवुसो सारिपुत्त, कथं पस्सता अञ्ञा ब्याकता खीणा जाती''ति इमं पठमं पञ्हं। **दन्धायितत्त**न्ति सत्थु आसयजाननत्थं दन्धभावो असीघता। **पठमं पञ्हं अनुमोदी**ति, ''जाति पनावुसो सारिपुत्त, किंनिदाना''ति इमं दुतियं पञ्हं पुच्छन्तो, ''यंनिदानावुसो, जाती''ति एवं विस्सज्जितं पठमं पञ्हं अनुमोदि।

एतदहोसीति भगवता अनुमोदिते नयसतेन नयसहस्सेन पञ्हस्स एकङ्गणिकभावेन पाकटीभूतत्ता एतं अहोसि। **दिवसम्पाहं भगवतो एतमत्थं ब्याकरेय्य**न्ति सकलदिवसम्पि अहं भगवतो एतं पटिच्चसमुप्पादत्थं पुट्ठो सकलदिवसम्पि अञ्ञमञ्ञेहि पदब्यञ्जनेहि ब्याकरेय्यं। **येन भगवा तेनुपसङ्कमी**ति एवं किरस्स अहोसि – ''थेरो उळारसीहनादं नदति, सुकारणं एतं, दसबलस्स नं आरोचेस्सामी''ति। तस्मा येन भगवा तेनुपसङ्कमि।

सा हि भिक्खु सारिपुत्तस्स धम्मधातूति एत्थ धम्मधातूति पच्चयाकारस्स विवटभावदस्सनसमत्थं सावकपारमीञाणं। सावकानञ्हि सावकपारमीञाणं सब्बञ्ञुतञ्ञाणगतिकमेव होति। यथा बुद्धानं अतीतानागतपच्चुप्पन्ना धम्मा सब्बञ्ञुतञ्ञाणस्स पाकटा होन्ति, एवं थेरस्स सावकपारमीञाणं सब्बेपि सावकञाणस्स गोचरधम्मे जानातीति। दुतियं।

३. ञाणवत्थुसुत्तवण्णना

३३. ततिये **तं सुणाथा**ति तं ञाणवत्थुदेसनं सुणाथ। **ञाणवत्थूनी**ति चेत्थ ञाणमेव ञाणवत्थूति वेदितब्बं। **जरामरणे ञाण**न्तिआदीसु चतूसु पठमं सवनमयञाणं सम्मसनञाणं पटिवेधञाणं पच्चवेक्खणञाणन्ति चतुब्बिधं वट्टति, तथा दुतियं। ततियं पन ठपेत्वा सम्मसनञाणं तिविधमेव होति, तथा चतुत्थं। लोकुत्तरधम्मेसु हि सम्मसनं नाम नत्थि। **जातिया ञाण**न्तिआदीसुपि एसेव नयो। **इमिना धम्मेना**ति इमिना चतुसच्चधम्मेन वा मग्गञाणधम्मेन वा।

दिट्ठेनातिआदीसु **दिट्ठेना**ति ञाणचक्खुना दिट्ठेन। **विदितेना**ति पञ्ञाय विदितेन। **अकालिकेना**ति किञ्चि कालं अनतिक्कमित्वा पटिवेधानन्तरंयेव फलदायकेन। **पत्तेना**ति अधिगतेन। **परियोगाळ्हेना**ति परियोगाहितेन पञ्ञाय अनुपविट्ठेन। **अतीतानागते नयं नेती**ति ''ये खो केची''तिआदिना नयेन अतीते च अनागते च नयं नेति। एत्थ च न चतुसच्चधम्मेन वा मग्गञाणधम्मेन वा सक्का अतीतानागते नयं नेतुं, चतुसच्चे पन मग्गञाणेन पटिविद्धे परतो पच्चवेक्खणञाणं नाम होति। तेन नयं नेतीति वेदितब्बा। **अब्भञ्ञंसू**ति अभिअञ्ञंसु जानिंसु। **सेय्यथापाहं, एतरही**ति यथा अहं एतरहि चतुसच्चवसेन जानामि। **अन्वये ञाण**न्ति अनुअये ञाणं, धम्मञाणस्स अनुगमने ञाणं, पच्चवेक्खणञाणस्सेतं नामं। **धम्मे ञाण**न्ति मग्गञाणं। इमस्मिं सुत्ते खीणासवस्स सेक्खभूमि कथिता होति। ततियं।

४. दुतियञाणवत्थुसुत्तवण्णना

३४. चतुत्थे **सत्तसत्तरी**ति सत्त च सत्तरि च। ब्यञ्जनभाणका किर ते भिक्खू, बहुब्यञ्जनं कत्वा वुच्चमाने पटिविज्झितुं सक्कोन्ति, तस्मा तेसं अज्झासयेन इदं सुत्तं वुत्तं। **धम्मट्ठितिञाण**न्ति पच्चयाकारे ञाणं। पच्चयाकारो हि धम्मानं पवत्तिट्ठितिकारणत्ता धम्मट्ठितीति वुच्चति, एत्थ ञाणं धम्मट्ठितिञाणं, एतस्सेव छब्बिधस्स ञाणस्सेतं अधिवचनं।

खयधम्मन्ति खयगमनसभावं। **वयधम्म**न्ति वयगमनसभावं। **विरागधम्म**न्ति विरज्जनसभावं। **निरोधधम्म**न्ति निरुज्झनसभावं। **सत्तसत्तरी**ति एकेकस्मिं सत्त सत्त कत्वा एकादससु पदेसु सत्तसत्तरि। इमस्मिं सुत्ते विपस्सनापटिविपस्सना कथिता। चतुत्थं।

५. अविज्जापच्चयसुत्तवण्णना

३५. पञ्चमे **समुदयो होती**ति सत्था इधेव देसनं ओसापेसि। किंकारणाति? दिट्ठिगतिकस्स ओकासदानत्थं। तस्सञ्हि परिसति उपारम्भचित्तो दिट्ठिगतिको अत्थि, सो पञ्हं पुच्छिस्सति, अथस्साहं विस्सज्जेस्सामीति तस्स ओकासदानत्थं देसनं ओसापेसि। **नो कल्लो पञ्हो**ति अयुत्तो पञ्हो। दुप्पञ्हो एसोति अत्थो। ननु च ''कतमं नु खो, भन्ते, जरामरण''न्ति? इदं सुपुच्छितन्ति। किञ्चापि सुपुच्छितं, यथा पन सतसहस्सग्घनिके सुवण्णथाले वड्ढितस्स सुभोजनस्स मत्थके आमलकमत्तेपि गूथपिण्डे ठपिते सब्बं भोजनं दुब्भोजनं होति छड्डेतब्बं, एवमेव ''कस्स च पनिदं जरामरण''न्ति? इमिना सत्तूपलद्धिवादपदेन गूथपिण्डेन तं भोजनं दुब्भोजनं विय अयम्पि सब्बो दुप्पञ्होव जातोति।

ब्रह्मचरियवासोति अरियमग्गवासो। **तं जीवं तं सरीर**न्ति यस्स हि अयं दिट्ठि, सो ''जीवे उच्छिज्जमाने सरीरं उच्छिज्जति, सरीरे उच्छिज्जन्ते जीवितं उच्छिज्जती''ति गण्हाति। एवं गण्हतो सा दिट्ठि ''सत्तो उच्छिज्जती''ति गहितत्ता उच्छेददिट्ठि नाम होति। सचे पन सङ्खाराव उप्पज्जन्ति चेव निरुज्झन्ति चाति गण्हेय्य, सासनावचरा सम्मादिट्ठि नाम भवेय्य। अरियमग्गो च नामेसो वट्टं निरोधेन्तो वट्टं समुच्छिन्दन्तो उप्पज्जति, तदेव तं वट्टं उच्छेददिट्ठिया गहिताकारस्स सम्भवे सति विनाव मग्गभावनाय निरुज्झतीति मग्गभावना निरत्थका होति। तेन वुत्तं ''ब्रह्मचरियवासो न होती''ति।

दुतियनये **अञ्ञं जीवं अञ्ञं सरीर**न्ति यस्स अयं दिट्ठि, सो ''सरीरं इधेव उच्छिज्जति, न जीवितं, जीवितं पन पञ्जरतो सकुणो विय यथासुखं गच्छती''ति गण्हाति। एवं गण्हतो सा दिट्ठि ''इमस्मा लोका जीवितं परलोकं गत''न्ति गहितत्ता सस्सतदिट्ठि नाम होति। अयञ्च अरियमग्गो तेभूमकवट्टं विवट्टेन्तो उप्पज्जति, सो एकसङ्खारेपि निच्चे धुवे सस्सते सति उप्पन्नोपि वट्टं विवट्टेतुं न सक्कोतीति मग्गभावना निरत्थका होति। तेन वुत्तं ''अञ्ञं जीवं अञ्ञं सरीरन्ति वा भिक्खु दिट्ठिया सति ब्रह्मचरियवासो न होती''ति।

विसूकायिकानीतिआदि सब्बं मिच्छादिट्ठिवेवचनमेव। सा हि सम्मादिट्ठिया विनिविज्झनट्ठेन विसूकमिव अत्तानं आवरणतो **विसूकायिकं,** सम्मादिट्ठिं अननुवत्तित्वा तस्सा विरोधेन पवत्तनतो **विसेवितं,** कदाचि उच्छेदस्स कदाचि सस्सतस्स गहणतो विरूपं फन्दितं **विप्फन्दित**न्ति वुच्चति। **तालावत्थुकतानी**ति तालवत्थु विय कतानि, पुन अविरुहणट्ठेन मत्थकच्छिन्नतालो विय समूलं तालं उद्धरित्वा तस्स पतिट्ठितट्ठानं विय च कतानीति अत्थो। **अनभावंकतानी**ति अनुअभावं कतानीति। पञ्चमं।

६. दुतियअविज्जापच्चयसुत्तवण्णना

३६. छट्ठे **इति वा, भिक्खवे, यो वदेय्या**ति तस्सं परिसति दिट्ठिगतिको पञ्हं पुच्छितुकामो अत्थि, सो पन अविसारदधातुको उट्ठाय दसबलं पुच्छितुं न सक्कोति, तस्मा तस्स अज्झासयेन सयमेव पुच्छित्वा विस्सज्जेन्तो सत्था एवमाह। छट्ठं।

७. नतुम्हसुत्तवण्णना

३७. सत्तमे **न तुम्हाक**न्ति अत्तनि हि सति अत्तनियं नाम होति। अत्तायेव च नत्थि, तस्मा ''न तुम्हाक''न्ति आह। **नपि अञ्ञेस**न्ति अञ्ञो नाम परेसं अत्ता, तस्मिं सति अञ्ञेसं नाम सिया, सोपि नत्थि, तस्मा ''नपि अञ्ञेस''न्ति आह। **पुराणमिदं, भिक्खवे, कम्म**न्ति नयिदं पुराणकम्ममेव, पुराणकम्मनिब्बत्तो पनेस कायो, तस्मा पच्चयवोहारेन एवं वुत्तो। **अभिसङ्खत**न्तिआदि कम्मवोहारस्सेव वसेन पुरिमलिङ्गसभागताय वुत्तं, अयं पनेत्थ अत्थो – **अभिसङ्खत**न्ति पच्चयेहि कतोति दट्ठब्बो। **अभिसञ्चेतयित**न्ति चेतनावत्थुको चेतनामूलकोति दट्ठब्बो। **वेदनिय**न्ति वेदनियवत्थूति दट्ठब्बो। सत्तमं।

८. चेतनासुत्तवण्णना

३८. अट्ठमे **यञ्च, भिक्खवे, चेतेती**ति यं चेतनं चेतेति, पवत्तेतीति अत्थो। **यञ्च पकप्पेती**ति यं पकप्पनं पकप्पेति, पवत्तेतिच्चेव अत्थो। **यञ्च अनुसेती**ति यञ्च अनुसयं अनुसेति, पवत्तेतिच्चेव अत्थो। एत्थ च **चेतेती**ति तेभूमककुसलाकुसलचेतना गहिता, **पकप्पेती**ति अट्ठसु लोभसहगतचित्तेसु तण्हादिट्ठिकप्पा गहिता, **अनुसेती**ति द्वादसन्नं चेतनानं सहजातकोटिया चेव उपनिस्सयकोटिया च अनुसयो गहितो। **आरम्मणमेतं होती**ति (चेतनादिधम्मजाते सति कम्मविञ्ञाणस्स उप्पत्तिया अवारितत्ता) एतं चेतनादिधम्मजातं पच्चयो होति। पच्चयो हि इध आरम्मणन्ति अधिप्पेता। **विञ्ञाणस्स ठितिया**ति कम्मविञ्ञाणस्स ठितत्थं। **आरम्मणे सती**ति तस्मिं पच्चये सति। **पतिट्ठा विञ्ञाणस्स होती**ति तस्स कम्मविञ्ञाणस्स पतिट्ठा होति। **तस्मिं पतिट्ठिते विञ्ञाणे**ति तस्मिं कम्मविञ्ञाणे पतिट्ठिते। **विरूळ्हे**ति कम्मं जवापेत्वा पटिसन्धिआकड्ढनसमत्थताय निब्बत्तमूले जाते। **पुनब्भवाभिनिब्बत्ती**ति पुनब्भवसङ्खाता अभिनिब्बत्ति।

नो चे, भिक्खवे, चेतेतीति इमिना तेभूमकचेतनाय अप्पवत्तनक्खणो वुत्तो। **नो चे पकप्पेती**ति इमिना तण्हादिट्ठिकप्पानं अप्पवत्तनक्खणो। **अथ चे अनुसेती**ति इमिना तेभूमकविपाकेसु परित्तकिरियासु रूपेति एत्थ अप्पहीनकोटिया अनुसयो गहितो। **आरम्मणमेतं होती**ति अनुसये सति कम्मविञ्ञाणस्स उप्पत्तिया अवारितत्ता एतं अनुसयजातं पच्चयोव होति।

नो चेव चेतेतीतिआदीसु पठमपदे तेभूमककुसलाकुसलचेतना निवत्ता, दुतियपदे अट्ठसु चित्तेसु तण्हादिट्ठियो, ततियपदे वुत्तप्पकारेसु धम्मेसु यो अप्पहीनकोटिया अनुसयितो अनुसयो, सो निवत्तो।

अपिचेत्थ असम्मोहत्थं चेतेति पकप्पेति अनुसेति, चेतेति न पकप्पेति अनुसेति, न चेतेति न पकप्पेति अनुसेति, न चेतेति न पकप्पेति न अनुसेतीति इदम्पि चतुक्कं वेदितब्बं। तत्थ पठमनये धम्मपरिच्छेदो दस्सितो। दुतियनये **चेतेती**ति तेभूमककुसलचेतना चेव चतस्सो च अकुसलचेतना गहिता। **न पकप्पेती**ति अट्ठसु चित्तेसु तण्हादिट्ठियो निवत्ता। **अनुसेती**ति तेभूमककुसले उपनिस्सयकोटिया, चतूसु अकुसलचेतनासु सहजातकोटिया चेव उपनिस्सयकोटिया च अनुसयो गहितो। ततियनये **न चेतेती**ति तेभूमककुसलाकुसलं निवत्तं, **न पकप्पेती**ति अट्ठसु चित्तेसु तण्हादिट्ठियो निवत्ता, **अनुसेती**ति सुत्ते आगतं वारेत्वा तेभूमककुसलाकुसलविपाककिरियारूपेसु अप्पहीनकोटिया उपनिस्सयो गहितो। चतुत्थनयो पुरिमसदिसोव।

तदप्पतिट्ठितेति तस्मिं अप्पतिट्ठिते। **अविरूळ्हे**ति कम्मं जवापेत्वा पटिसन्धिआकड्ढनसमत्थताय अनिब्बत्तमूले। एत्थ पन किं कथितन्ति? अरहत्तमग्गस्स किच्चं, खीणासवस्स किच्चकरणन्तिपि नवलोकुत्तरधम्मातिपि वत्तुं वट्टति। एत्थ च विञ्ञाणस्स चेव आयतिं पुनब्भवस्स च अन्तरे एको सन्धि, वेदनातण्हानमन्तरे एको, भवजातीनमन्तरे एकोति। अट्ठमं।

९. दुतियचेतनासुत्तवण्णना

३९. नवमे विञ्ञाणनामरूपानं अन्तरे एको सन्धि, वेदनातण्हानमन्तरे एको, भवजातीनमन्तरे एकोति। नवमं।

१०. ततियचेतनासुत्तवण्णना

४०. दसमे **नती**ति तण्हा। सा हि पियरूपेसु रूपादीसु नमनट्ठेन ''नती''ति वुच्चति। **आगति गति होती**ति आगतिम्हि गति होति, आगते पच्चुपट्ठिते कम्मे वा कम्मनिमित्ते वा गहिनिमित्ते वा पटिसन्धिवसेन विञ्ञाणस्स गति होति। **चुतूपपातो**ति एवं विञ्ञाणस्स आगते पटिसन्धिविसये गतिया सति इतो चवनसङ्खाता चुति, तत्थूपपत्तिसङ्खातो उपपातोति अयं चुतूपपातो नाम होति। एवं इमस्मिं सुत्ते नतिया च आगतिगतिया च अन्तरे एकोव सन्धि कथितोति। दसमं।

कळारखत्तियवग्गो चतुत्थो।

५. गहपतिवग्गो

१. पञ्चवेरभयसुत्तवण्णना

४१. गहपतिवग्गस्स पठमे **यतो**ति यदा। **भयानि वेरानी**ति भयवेरचेतनायो। **सोतापत्तियङ्गेही**ति दुविधं सोतापत्तिया अङ्गं, (सोतापत्तिया च अङ्गं,) यं पुब्बभागे सोतापत्तिपटिलाभाय संवत्तति, ''सप्पुरिससंसेवो सद्धम्मस्सवनं योनिसोमनसिकारो धम्मानुधम्मप्पटिपत्ती''ति (दी॰ नि॰ ३.३११) एवं आगतं, पटिलद्धगुणस्स च सोतापत्तिं पत्वा ठितस्स अङ्गं, यं सोतापन्नस्स अङ्गन्तिपि वुच्चति, बुद्धे अवेच्चप्पसादादीनं एतं अधिवचनं। इदमिध अधिप्पेतं। **अरियो**ति निद्दोसो निरुपारम्भो। **ञायो**ति पटिच्चसमुप्पन्नं ञत्वा ठितञाणम्पि पटिच्चसमुप्पादोपि। यथाह – ''ञायो वुच्चति पटिच्चसमुप्पादो, अरियोपि अट्ठङ्गिको मग्गो ञायो''ति। **पञ्ञाया**ति अपरापरं उप्पन्नाय विपस्सनापञ्ञाय। **सुदिट्ठो होती**ति अपरापरं उप्पज्जित्वा दस्सनवसेन सुट्ठु दिट्ठो।

खीणनिरयोतिआदीसु आयतिं तत्थ अनुप्पज्जनताय खीणो निरयो मय्हन्ति सो अहं खीणनिरयो। एस नयो सब्बत्थ। **सोतापन्नो**ति मग्गसोतं आपन्नो। **अविनिपातधम्मो**ति न विनिपातसभावो। **नियतो**ति पठममग्गसङ्खातेन सम्मत्तनियामेन नियतो। **सम्बोधिपरायनो**ति उत्तरिमग्गत्तयसङ्खातो सम्बोधि परं अयनं मय्हन्ति सोहं सम्बोधिपरायनो, तं सम्बोधिं अवस्सं अभिसम्बुज्झनकोति अत्थो।

पाणातिपातपच्चयाति पाणातिपातकम्मकारणा। **भयं वेर**न्ति अत्थतो एकं। वेरञ्च नामेतं दुविधं होति बाहिरं अज्झत्तिकन्ति। एकेन हि एकस्स पिता मारितो होति, सो चिन्तेसि ''एतेन किर मे पिता मारितो, अहम्पि तंयेव मारेस्सामी''ति निसितं सत्थं आदाय चरति। या तस्स अब्भन्तरे उप्पन्नवेरचेतना, इदं बाहिरं वेरं नाम। या पन इतरस्स ''अयं किर मं मारेस्सामीति चरति, अहमेव नं पठमतरं मारेस्सामी''ति चेतना उप्पज्जति, इदं अज्झत्तिकं वेरं नाम। इदं ताव उभयम्पि दिट्ठधम्मिकमेव। या पन तं निरये उप्पन्नं दिस्वा ''एतं पहरिस्सामी''ति जलितं अयमुग्गरं गण्हतो निरयपालस्स चेतना उप्पज्जति, इदमस्स सम्परायिकं बाहिरवेरं। या चस्स ''अयं निद्दोसं मं पहरिस्सामीति आगच्छति, अहमेव नं पठमतरं पहरिस्सामी''ति चेतना उप्पज्जति, इदमस्स सम्परायिकं अज्झत्तवेरं। यं पनेतं बाहिरवेरं, तं अट्ठकथायं ''पुग्गलवेर''न्ति वुत्तं। **दुक्खं दोमनस्स**न्ति अत्थतो एकमेव। यथा चेत्थ, एवं सेसपदेसुपि ''इमिना मम भण्डं हटं, मय्हं

दारेसु चारित्तं आपन्नं, मुसा वत्वा अत्थो भग्गो, सुरामदमत्तेन इदं नाम कत''न्तिआदिना नयेन वेरुप्पत्ति वेदितब्बा। **अवेच्चप्पसादेना**ति अधिगतेन अचलप्पसादेन। **अरियकन्तेही**ति पञ्चहि सीलेहि। तानि हि अरियानं कन्तानि पियानि। भवन्तरगतापि अरिया तानि न विजहन्ति, तस्मा ''अरियकन्तानी''ति वुच्चन्ति। सेसमेत्थ यं वत्तब्बं सिया, तं सब्बं विसुद्धिमग्गे अनुस्सतिनिद्देसे वुत्तमेव। पठमं।

२. दुतियपञ्चवेरभयसुत्तवण्णना

४२. दुतिये भिक्खूनं कथितभावमत्तमेव विसेसो। दुतियं।

३. दुक्खसुत्तवण्णना

४३. ततिये **दुक्खस्सा**ति वट्टदुक्खस्स। **समुदय**न्ति द्वे समुदया खणिकसमुदयो च पच्चयसमुदयो च। पच्चयसमुदयं पस्सन्तोपि भिक्खु खणिकसमुदयं पस्सति, खणिकसमुदयं पस्सन्तोपि पच्चयसमुदयं पस्सति। अत्थङ्गमोपि अच्चन्तत्थङ्गमो भेदत्थङ्गमोति दुविधो। अच्चन्तत्थङ्गमं पस्सन्तोपि भेदत्थङ्गमं पस्सति, भेदत्थङ्गमं पस्सन्तोपि अच्चन्तत्थङ्गमं पस्सति। **देसेस्सामी**ति इदं वट्टदुक्खस्स समुदयअत्थङ्गमं निब्बत्तिभेदं नाम देसेस्सामि, तं सुणाथाति अत्थो। **पटिच्चा**ति निस्सयवसेन चेव आरम्मणवसेन च पच्चयं कत्वा। **तिण्णं सङ्गति फस्सो**ति तिण्णं सङ्गतिया फस्सो। **अयं खो, भिक्खवे, दुक्खस्स समुदयो**ति अयं वट्टदुक्खस्स निब्बत्ति नाम। **अत्थङ्गमो**ति भेदो। एवञ्हि वट्टदुक्खं भिन्नं होति अप्पटिसन्धियं। ततियं।

४. लोकसुत्तवण्णना

४४. चतुत्थे **लोकस्सा**ति सङ्खारलोकस्स। अयमेत्थ विसेसो। चतुत्थं।

५. ञातिकसुत्तवण्णना

४५. पञ्चमे **ञातिके**ति द्विन्नं ञातकानं गामे। **गिञ्जकावसथे**ति इट्ठकाहि कते महापासादे। **धम्मपरियाय**न्ति धम्मकारणं। **उपस्सुती**ति उपस्सुतिट्ठानं, यं ठानं उपगतेन सक्का होति भगवतो सद्दं सोतुं, तत्थ ठितोति अत्थो। सो किर गन्धकुटिपरिवेणसम्मज्जनत्थं आगतो अत्तनो कम्मं पहाय भगवतो धम्मघोसं सुणन्तो अट्ठासि। **अद्दसा**ति तदा किर भगवतो आदितोव पच्चयाकारं मनसिकरोन्तस्स ''इदं इमिना पच्चयेन होति, इदं इमिना''ति आवज्जतो याव भवग्गा एकङ्गणं अहोसि, सत्था मनसिकारं पहाय वचसा सज्झायं करोन्तो यथानुसन्धिना देसनं निट्ठपेत्वा, ''अपि नु खो इमं धम्मपरियायं कोचि अस्सोसी''ति आवज्जेन्तो तं भिक्खुमद्दस। तेन वुत्तं ''अद्दसा खो भगवा''ति।

अस्सोसि नोति अस्सोसि नु। अथ वा **अस्सोसि नो**ति अम्हाकं भासन्तानं अस्सोसीति। **उग्गण्हाही**तिआदीसु सुत्वा तुण्हीभूतोव पगुणं करोन्तो उग्गण्हाति नाम। पदानुपदं घटेत्वा वाचाय परिचितं करोन्तो परियापुणाति नाम। उभयथापि पगुणं आधारप्पत्तं करोन्तो धारेति नाम। **अत्थसंहितो**ति कारणनिस्सितो। **आदिब्रह्मचरियको**ति मग्गब्रह्मचरियस्स आदि पतिट्ठानभूतो। इति तीसुपि इमेसु सुत्तेसु वट्टविवट्टमेव कथितं। पञ्चमं।

६. अञ्ञतरब्राह्मणसुत्तवण्णना

४६. छट्ठे **अञ्ञतरो**ति नामवसेन अपाकटो अञ्ञतरो ब्राह्मणो। छट्ठं।

७. जाणुस्सोणिसुत्तवण्णना

४७. सत्तमे **जाणुस्सोणी**ति ठानन्तरवसेन एवंलद्धनामो असीतिकोटिविभवो महापुरोहितो। सत्तमं।

८. लोकायतिकसुत्तवण्णना

४८. अट्ठमे **लोकायतिको**ति वितण्डसत्थे लोकायते कतपरिचयो। **जेट्ठमेतं लोकायत**न्ति पठमं लोकायतं। **लोकायत**न्ति च लोकस्सेव आयतं, बालपुथुज्जनलोकस्स आयतं, महन्तं गम्भीरन्ति उपधारितब्बं परित्तं भावं दिट्ठिगतं। **एकत्त**न्ति एकसभावं, निच्चसभावमेवाति पुच्छति। **पुथुत्त**न्ति पुरिमसभावेन नानासभावं, देवमनुस्सादिभावेन पठमं हुत्वा पच्छा न होतीति उच्छेदं सन्धाय पुच्छति। एवमेत्थ ''सब्बमत्थि, सब्बमेकत्त''न्ति इमा द्वेपि सस्सतदिट्ठियो, ''सब्बं नत्थि, सब्बं पुथुत्त''न्ति इमा द्वे उच्छेददिट्ठियोति वेदितब्बा। अट्ठमं।

९. अरियसावकसुत्तवण्णना

४९. नवमे **किं नु खो**ति संसयुप्पत्तिआकारदस्सनं। **समुदयती**ति उप्पज्जति। नवमं।

१०. दुतियअरियसावकसुत्तवण्णना

५०. दसमे द्वेपि नया एकतो वुत्ता। इदमेव पुरिमेन नानत्तं, सेसं तादिसमेवाति। दसमं।

गहपतिवग्गो पञ्चमो।

६. दुक्खवग्गो

१. परिवीमंसनसुत्तवण्णना

५१. दुक्खवग्गस्स पठमे **परिवीमंसमानो**ति उपपरिक्खमानो। **जरामरण**न्ति कस्मा जरामरणं एकमेव ''अनेकविधं नानप्पकारक''न्ति वत्वा गहितन्ति चे? तस्मिं गहिते सब्बदुक्खस्स गहितत्ता। यथा हि चूळाय गहिते पुरिसे सो पुरिसो गहितोव होति, एवं जरामरणे गहिते सब्बदुक्खं गहितमेव होति। तस्मा ''यं खो इदं अनेकविधं नानप्पकारकं दुक्खं लोके उप्पज्जती''ति न्हत्वा ठितं पुरिसं विय सब्बदुक्खं दस्सेत्वा तं चूळाय गण्हन्तो विय जरामरणं गण्हि।

जरामरणनिरोधसारुप्पगामिनीति जरामरणनिरोधस्स सारुप्पभावेन निक्किलेसताय परिसुद्धताय सदिसाव हुत्वा गामिनीति अत्थो। **तथा पटिपन्नो च होती**ति यथा तं पटिपन्नोति वुच्चति, एवं पटिपन्नो होति। **अनुधम्मचारी**ति निब्बानधम्मं अनुगतं पटिपत्तिधम्मं चरति, पूरेतीति अत्थो। **दुक्खक्खयाय पटिपन्नो**ति सीलं आदिं कत्वा जरामरणदुक्खस्स निरोधत्थाय पटिपन्नो। **सङ्खारनिरोधाया**ति सङ्खारदुक्खस्स निरोधत्थाय। एत्तावता याव अरहत्ता देसना कथिता।

इदानि अरहत्तफलपच्चवेक्खणं सततविहारञ्च दस्सेत्वा देसना निवत्तेतब्बा सिया, तथा अकत्वा **अविज्जागतो**ति इदं कस्मा गण्हातीति? खीणासवस्स समतिक्कन्तवट्टदुक्खदस्सनत्थं। अपिच पुन वट्टं आरभित्वा विवट्टे कथियमाने बुज्झनकसत्तो चेत्थ अत्थि, तस्स अज्झासयवसेनापि इदं गण्हातीति वेदितब्बो। तत्थ **अविज्जागतो**ति अविज्जाय गतो उपगतो समन्नागतो। **पुरिसपुग्गलो**ति पुरिसोयेव पुग्गलो। उभयेनापि सम्मुतिकथं कथेति। बुद्धानञ्हि सम्मुतिकथा परमत्थकथाति द्वे कथा होन्ति। तत्थ "सत्तो नरो पुरिसो पुग्गलो तिस्सो नागो"ति एवं पवत्ता सम्मुतिकथा नाम। "खन्धा धातुयो आयतनानी"ति एवं पवत्ता परमत्थकथा नाम। परमत्थं कथेन्तापि सम्मुतिं अमुञ्चित्वा कथेन्ति। ते सम्मुतिं कथेन्तापि परमत्थं कथेन्तापि सच्चमेव कथेन्ति। तेनेव वुत्तं –

"दुवे सच्चानि अक्खासि, सम्बुद्धो वदतं वरो।
सम्मुतिं परमत्थञ्च, ततियं नूपलब्भति।
सङ्केतवचनं सच्चं, लोकसम्मुतिकारणं।
परमत्थवचनं सच्चं, धम्मानं भूतलक्खण"न्ति॥

पुञ्ञं चे सङ्खारन्ति तेरसचेतनाभेदं पुञ्ञाभिसङ्खारं। **अभिसङ्खरोती**ति करोति। **पुञ्ञूपगं होति विञ्ञाण**न्ति कम्मविञ्ञाणं कम्मपुञ्ञेन उपगतं सम्पयुत्तं होति, विपाकविञ्ञाणं विपाकपुञ्ञेन। **अपुञ्ञं चे सङ्खार**न्ति द्वादसचेतनाभेदं अपुञ्ञाभिसङ्खारं अभिसङ्खरोति। **आनेञ्जं चे सङ्खार**न्ति चतुचेतनाभेदं आनेञ्जाभिसङ्खारं। **आनेञ्जूपगं होति विञ्ञाण**न्ति कम्मानेञ्जेन कम्मविञ्ञाणं, विपाकानेञ्जेन विपाकविञ्ञाणं उपगतं होति। एत्थ च तिविधस्स कम्माभिसङ्खारस्स गहितत्ता द्वादसपदिको पच्चयाकारो गहितोव होति। एत्तावता वट्टं दस्सितं।

इदानि विवट्टं दस्सेन्तो **यतो खो, भिक्खवे**तिआदिमाह। तत्थ **अविज्जा**ति चतूसु सच्चेसु अञ्ञाणं। **विज्जा**ति अरहत्तमग्गञाणं। एत्थ च पठममेव अविज्जाय पहीनाय विज्जा उप्पज्जति। यथा पन चतुरङ्गेपि तमे रत्तिं पदीपुज्जलेन अन्धकारो पहीयति, एवं विज्जुप्पादा अविज्जाय पहानं वेदितब्बं। **न किञ्चि लोके उपादियती**ति लोके किञ्चि धम्मं न गण्हाति न परामसति। **अनुपादियं न परितस्सती**ति अनुपादियन्तो अगण्हन्तो नेव तण्हापरितस्सनाय, न भयपरितस्सनाय परितस्सति, न तण्हायति न भायतीति अत्थो। **पच्चत्तञ्ञेवा**ति सयमेव अत्तनाव परिनिब्बायति, न अञ्ञस्स आनुभावेन।

सो सुखं चे वेदनन्ति इदं कस्मा आरभि? खीणासवस्स पच्चवेक्खणञाणं दस्सेत्वा सततविहारं दस्सेतुं आरभि। **अनज्झोसिता**ति तण्हाय गिलित्वा परिनिट्ठपेत्वा अगहिता। अथ दुक्खवेदना कस्मा वुत्ता, किं तम्पि अभिनन्दन्तो अत्थीति? आम अत्थि। सुखं अभिनन्दन्तोयेव हि दुक्खं अभिनन्दति नाम दुक्खं पत्वा सुखं पत्थनतो सुखस्स च विपरिणामदुक्खतोति। **कायपरियन्तिक**न्ति कायपरिच्छिन्नं, याव पञ्चद्वारकायो पवत्तति, ताव पवत्तं पञ्चद्वारिकवेदनन्ति अत्थो। **जीवितपरियन्तिक**न्ति जीवितपरिच्छिन्नं। याव जीवितं पवत्तति, ताव पवत्तं मनोद्वारिकवेदनन्ति अत्थो।

तत्थ पञ्चद्वारिकवेदना पच्छा उप्पज्जित्वा पठमं निरुज्झति, मनोद्वारिकवेदना पठमं उप्पज्जित्वा पच्छा निरुज्झति। सा हि पटिसन्धिक्खणे वत्थुरूपस्मिंयेव पतिट्ठाति। पञ्चद्वारिका पवत्ते पञ्चद्वारवसेन पवत्तमाना पठमवये वीसतिवस्सकाले रज्जनदुस्सनमुय्हनवसेन अधिमत्ता बलवती होति, पण्णासवस्सकाले ठिता होति, सट्ठिवस्सकालतो पट्ठाय परिहायमाना असीतिनवुतिवस्सकाले मन्दा होति। तदा हि सत्ता "चिररत्तं एकतो निसीदिम्हा निपज्जिम्हा"ति वदन्तेपि "न सञ्जानामा"ति वदन्ति। अधिमत्तानिपि रूपादिआरम्मणानि "न पस्साम न सुणाम", "सुगन्धं दुग्गन्धं वा सादुं असादुं वा थद्धं मुदुकन्ति वा न जानामा"ति वदन्ति। इति नेसं पञ्चद्वारिकवेदना भग्गा होति, मनोद्वारिकाव पवत्तति। सापि अनुपुब्बेन

परिहायमाना मरणसमये हदयकोटिंयेव निस्साय पवत्तति। याव पनेसा पवत्तति, ताव सत्तो जीवतीति वुच्चति। यदा नप्पवत्तति, तदा मतो निरुद्धोति वुच्चति।

स्वायमत्थो वापिया दीपेतब्बो –

यथा हि पुरिसो पञ्चउदकमग्गसम्पन्नं वापिं करेय्य, पठमं देवे वुट्ठे पञ्चहि उदकमग्गेहि उदकं पविसित्वा अन्तोवापियं आवाटे पूरेय्य, पुनप्पुनं देवे वस्सन्ते उदकमग्गे पूरेत्वा गावुतड्ढयोजनमत्तं ओत्थरित्वा उदकं तिट्ठेय्य ततो ततो विस्सन्दमानं, अथ निद्धमनतुम्बे विवरित्वा खेत्तेसु कम्मे करियमाने उदकं निक्खमन्तं, सस्सपाककाले (उदकं निक्खमन्तं,) उदकं परिहीनं ''मच्छे गण्हामा''ति वत्तब्बतं आपज्जेय्य, ततो कतिपाहेन आवाटेसुयेव उदकं सण्ठहेय्य। याव पन तं आवाटेसु होति, ताव ''महावापियं उदकं अत्थी''ति सङ्खं गच्छति। यदा पन तत्थ छिज्जति, तदा ''वापियं उदकं नत्थी''ति वुच्चति, एवंसम्पदमिदं वेदितब्बं।

पठमं देवे वस्सन्ते पञ्चहि मग्गेहि उदके पविसन्ते आवाटानं पूरणकालो विय हि पठममेव पटिसन्धिक्खणे मनोद्वारिकवेदनाय वत्थुरूपे पतिट्ठितकालो, पुनप्पुनं देवे वस्सन्ते पञ्चन्नं मग्गानं पूरितकालो विय पवत्ते पञ्चद्वारिकवेदनाय पवत्तिकालो, गावुतड्ढयोजनमत्तं अज्झोत्थरणं विय पठमवये वीसतिवस्सकाले रज्जनादिवसेन तस्सा अधिमत्तबलवभावो, याव वापितो उदकं न निग्गच्छति, ताव पूराय वापिया ठितकालो विय पञ्ञासवस्सकाले तस्सा ठितकालो, निद्धमनतुम्बेसु विवटेसु कम्मन्ते करियमाने उदकस्स निक्खमनकालो विय सट्ठिवस्सकालतो पट्ठाय तस्सा परिहानि, उदके भट्ठे उदकमग्गेसु परित्तोदकस्स ठितकालो विय असीतिनवुतिवस्सकाले पञ्चद्वारिकवेदनाय मन्दकालो, आवाटेसुयेव उदकस्स पतिट्ठानकालो विय हदयवत्थुकोटिं निस्साय मनोद्वारिकवेदनाय पवत्तिकालो, आवाटेसु परित्तेपि उदके सति ''वापियं उदकं अत्थी''ति वत्तब्बकालो विय याव सा पवत्तति, ताव ''सत्तो जीवती''ति वुच्चति। यथा पन आवाटेसु उदके छिन्ने ''नत्थि वापियं उदक''न्ति वुच्चति, एवं मनोद्वारिकवेदनाय अप्पवत्तमानाय ''सत्तो मतो''ति वुच्चति। इमं वेदनं सन्धाय वुत्तं ''जीवितपरियन्तिकं वेदनं वेदियमानो''ति।

कायस्स भेदाति कायस्स भेदेन। **जीवितपरियादाना उद्ध**न्ति जीवितक्खयतो उद्धं। **इधेवा**ति पटिसन्धिवसेन परतो अगन्त्वा इधेव। **सीतीभविस्सन्ती**ति पवत्तिविप्फन्ददरथरहितानि सीतानि अप्पवत्तनधम्मानि भविस्सन्ति। **सरीरानी**ति धातुसरीरानि। **अवसिस्सन्ती**ति अवसिट्ठानि भविस्सन्ति।

कुम्भकारपाकाति कुम्भकारस्स भाजनपचनट्ठानतो। **पटिसिस्सेय्या**ति ठपेय्य। **कपल्लानी**ति सह मुखवट्टिया एकाबद्धानि कुम्भकपल्लानि। **अवसिस्सेय्यु**न्ति तिट्ठेय्युं। **एवमेव खो**ति एत्थ इदं ओपम्मसंसन्दनं – आदित्तकुम्भकारपाको विय हि तयो भवा दट्ठब्बा, कुम्भकारो विय योगावचरो, पाकतो कुम्भकारभाजनानं नीहरणदण्डको विय अरहत्तमग्गञाणं, समो भूमिभागो विय असङ्खतं निब्बानतलं, दण्डकेन उण्हकुम्भं आकड्ढित्वा समे भूमिभागे कुम्भस्स ठपितकालो विय आरद्धविपस्सकस्स रूपसत्तकं अरूपसत्तकं विपस्सन्तस्स कम्मट्ठाने च पगुणे विभूते उपट्ठहमाने तथारूपं उतुसप्पायादिं लभित्वा एकासने निसिन्नस्स विपस्सनं वड्ढेत्वा अग्गफलं अरहत्तं पत्वा चतूहि अपायेहि अत्तभावं उद्धरित्वा फलसमापत्तिवसेन असङ्खते निब्बानतले ठितकालो दट्ठब्बो। खीणासवो पन उण्हकुम्भो विय अरहत्तप्पत्तदिवसेयेव न परिनिब्बाति, सासनप्पवेणिं पन घटयमानो पण्णाससट्ठिवस्सानि ठत्वा चरिमकचित्तप्पत्तिया उपादिण्णकक्खन्धभेदा अनुपादिसेसाय निब्बानधातुया परिनिब्बाति। अथस्स कुम्भस्स विय कपल्लानि अनुपादिण्णकसरीरानेव अवसिस्सन्तीति। **सरीरानि अवसिस्सन्तीति पजानाती**ति इदं पन खीणासवस्स अनुयोगारोपनत्थं वुत्तं।

विञ्ञाणं पञ्ञायेथाति पटिसन्धिविञ्ञाणं पञ्ञायेथ। **साधु साधू**ति थेरानं ब्याकरणं सम्पहंसति। **एवमेत**न्ति यदेतं तिविधे अभिसङ्खारे असति पटिसन्धिविञ्ञाणस्स अप्पञ्ञाणन्तिआदि, एवमेव एतं। **अधिमुच्चथा**ति सन्निट्ठानसङ्खातं अधिमोक्खं पटिलभथ। **एसेवन्तो दुक्खस्सा**ति अयमेव वट्टदुक्खस्स अन्तो अयं परिच्छेदो, यदिदं निब्बानन्ति। पठमं।

२. उपादानसुत्तवण्णना

५२. दुतिये **उपादानियेसू**ति चतुन्नं उपादानानं पच्चयेसु तेभूमकधम्मेसु। **अस्सादानुपस्सिनो**ति अस्सादं अनुपस्सन्तस्स। **तत्रा**ति तस्मिं अग्गिक्खन्धे। **तदाहारो**ति तंपच्चयो। **तदुपादानो**ति तस्सेव वेवचनं। **एवमेव खो**ति एत्थ अग्गिक्खन्धो विय हि तयो भवा, तेभूमकवट्टन्तिपि एतदेव, अग्गिजग्गकपुरिसो विय वट्टनिस्सितो बालपुथुज्जनो, सुक्खतिणगोमयादिपक्खिपनं विय अस्सादानुपस्सिनो पुथुज्जनस्स तण्हादिवसेन छहि द्वारेहि कुसलाकुसलकम्मकरणं। तिणगोमयादीसु खीणेसु पुनप्पुनं तेसं पक्खिपनेन अग्गिक्खन्धस्स वड्ढनं विय बालपुथुज्जनस्स उट्ठाय समुट्ठाय यथावुत्तकम्मायूहनेन अपरापरं वट्टदुक्खनिब्बत्तनं।

न कालेन कालं सुक्खानि चेव तिणानि पक्खिपेय्याति तञ्हि कोचि अत्थकामो एवं वदेय्य – ‘‘भो कस्मा उट्ठाय समुट्ठाय कलापे बन्धित्वा सुक्खतिणकट्ठानं पच्छियञ्च पूरेत्वा सुक्खगोमयानि पक्खिपन्तो एतं अग्गिं जालेसि? अपि नु ते अत्थि इतोनिदानं काचि वड्ढीति? वंसागतमेतं भो अम्हाकं, इतोनिदानं पन मे अवड्ढियेव, कुतो वड्ढि? अहञ्हि इमं अग्गिं जग्गन्तो नेव न्हायितुं न भुञ्जितुं न निपज्जितुं लभामीति। तेन हि भो किं ते इमिना निरत्थकेन अग्गिजालनेन? एहि त्वं एतानि आभतानि तिणादीनि एत्थ निक्खिप, तानि सयमेव झायिस्सन्ति, त्वं पन असुकस्मिं ठाने सीतोदका पोक्खरणी अत्थि, तत्थ न्हत्वा, मालागन्धविलेपनेहि अत्तानं मण्डेत्वा सुनिवत्थो सुपारुतोव पादुकाहि नगरं पविसित्वा पासादवरमारुय्ह वातपानं विवरित्वा महावीथियं विरोचमानो निसीद एकग्गो सुखसमप्पितो हुत्वा, तत्थ ते निसिन्नस्स तिणादीनं खयेन सयमेव अयं अग्गि अप्पण्णत्तिभावं गमिस्सती’’ति। सो तथा करेय्य। तथेव च तत्थ निसिन्नस्स सो अग्गि उपादानक्खयेन अप्पण्णत्तिभावं गच्छेय्य। इदं सन्धायेतं ‘‘न कालेन काल’’न्तिआदि वुत्तं।

एवमेव खोति एत्थ पन इदं ओपम्मसंसन्दनं – चत्तालीसाय कट्ठवाहानं जलमानो महाअग्गिक्खन्धो विय हि तेभूमकवट्टं दट्ठब्बं, अग्गिजग्गनकपुरिसो विय वट्टसन्निस्सितको योगावचरो, अत्थकामो पुरिसो विय सम्मासम्बुद्धो, तेन पुरिसेन तस्स दिन्नओवादो विय तथागतेन ‘‘एहि त्वं, भिक्खु, तेभूमकधम्मेसु निब्बिन्द, एवं वट्टदुक्खा मुच्चिस्ससी’’ति तस्स तेभूमकधम्मेसु कम्मट्ठानस्स कथितकालो, तस्स पुरिसस्स यथानुसिट्ठं पटिपज्जित्वा पासादे निसिन्नकालो विय योगिनो सुगतोवादं सम्पटिच्छित्वा सुञ्ञागारं पविट्ठस्स तेभूमकधम्मेसु विपस्सनं पट्ठपेत्वा अनुक्कमेन यथानुरूपं आहारसप्पायादिं लभित्वा, एकासने निसिन्नस्स अग्गफले पतिट्ठितकालो, तस्स न्हानविलेपनादीहि सुधोतमण्डितकायत्ता तस्मिं निसिन्नस्स एकग्गसुखसमप्पितकालो विय योगिनो अरियमग्गपोक्खरणियं मग्गञाणोदकेन सुन्हातसुधोतकिलेसमलस्स हिरोत्तप्पसाटके निवासेत्वा सीलविलेपनानुलित्तस्स अरहत्तमण्डनेन अत्तभावं मण्डेत्वा विमुत्तिपुप्फदामं पिळन्धित्वा इद्धिपादपादुका आरुय्ह निब्बाननगरं पविसित्वा धम्मपासादं आरुय्ह सतिपट्ठानमहावीथियं विरोचमानस्स निब्बानारम्मणं फलसमापत्तिं अप्पेत्वा निसिन्नकालो। तस्स पन पुरिसस्स तस्मिं निसिन्नस्स तिणादीनं खयेन अग्गिक्खन्धस्स अप्पण्णत्तिगमनकालो विय खीणासवस्स यावतायुकं ठत्वा उपादिण्णकक्खन्धभेदेन अनुपादिसेसाय निब्बानधातुया परिनिब्बुतस्स महावट्टवूपसमो दट्ठब्बो। दुतियं।

३. संयोजनसुत्तवण्णना

५३. ततिये **संयोजनियेसू**ति दसन्नं संयोजनानं पच्चयेसु। **झायेय्या**ति जलेय्य। **तेलं आसिञ्चेय्य वट्टिं उपसंहरेय्या**ति दीपपटिजग्गनत्थं तेलभाजनञ्च महन्तञ्च वट्टिकपालं गहेत्वा समीपे निच्चं ठितोव तेले खीणे तेलं आसिञ्चेय्य, वट्टिया खीणाय वट्टिं उपसंहरेय्य। सेसमेत्थ सद्धिं ओपम्मसंसन्दनेन पुरिमनयेनेव वेदितब्बं। ततियं।

४. दुतियसंयोजनसुत्तवण्णना

५४. चतुत्थे उपमं पठमं कत्वा पच्छा अत्थो वुत्तो। सेसं तादिसमेव। चतुत्थं।

५. महारुक्खसुत्तवण्णना

५५. पञ्चमे **उद्धं ओजं अभिहरन्ती**ति पथवीरसञ्च आपोरसञ्च उपरि आरोपेन्ति। ओजाय आरोपितत्ता हत्थसतुब्बेधस्स रुक्खस्स अङ्कुरग्गेसु बिन्दुबिन्दूनि विय हुत्वा सिनेहो तिट्ठति। इदं पनेत्थ ओपम्मसंसन्दनं – महारुक्खो विय हि तेभूमकवट्टं, मूलानि विय आयतनानि, मूलेहि ओजाय आरोहनं विय छहि द्वारेहि कम्मारोहनं, ओजाय अभिरुळ्हत्ता महारुक्खस्स यावकप्पट्ठानं विय वट्टनिस्सितबालपुथुज्जनस्स छहि द्वारेहि कम्मं आयूहन्तस्स अपरापरं वट्टस्स वड्ढनवसेन दीघरत्तं ठानं।

कुद्दालपिटकन्ति कुद्दालञ्चेव पच्छिभाजनञ्च। **खण्डाखण्डिकं छिन्देय्या**ति खुद्दकमहन्तानि खण्डाखण्डानि करोन्तो छिन्देय्य। इदं पनेत्थ ओपम्मसंसन्दनं – इधापि हि महारुक्खो विय तेभूमकवट्टं, रुक्खं नासेतुकामो पुरिसो विय योगावचरो, कुद्दालो विय ञाणं, पच्छि विय समाधि, रुक्खच्छेदनफरसु विय ञाणं, रुक्खस्स मूले छिन्नकालो विय योगिनो आचरियसन्तिके कम्मट्ठानं गहेत्वा मनसिकरोन्तस्स पञ्ञा, खण्डाखण्डिकं छिन्दनकालो विय सङ्खेपतो चतुन्नं महाभूतानं मनसिकारो, फालनं विय द्वेचत्तालीसाय कोट्ठासेसु वित्थारमनसिकारो, सकलिकं सकलिकं करणकालो विय उपादारूपस्स चेव रूपक्खन्धारम्मणस्स विञ्ञाणस्स चाति इमेसं वसेन नामरूपपरिग्गहो, मूलानं उपच्छेदनं विय तस्सेव नामरूपस्स पच्चयपरियेसनं, वातातपे विसोसेत्वा अग्गिना डहनकालो विय अनुपुब्बेन विपस्सनं वड्ढेत्वा अञ्ञतरं सप्पायं लभित्वा कम्मट्ठाने विभूते उपट्ठहमाने एकपल्लङ्के निसिन्नस्स समणधम्मं करोन्तस्स अग्गफलप्पत्ति, मसिकरणं विय अरहत्तप्पत्तदिवसेयेव अपरिनिब्बायन्तस्स यावतायुकं ठित कालो, महावाते ओपुननं नदिया पवाहनं विय च उपादिण्णकक्खन्धभेदेन अनुपादिसेसाय निब्बानधातुया परिनिब्बुतस्स वट्टवूपसमो वेदितब्बो। पञ्चमं।

६. दुतियमहारुक्खसुत्तवण्णना

५६. छट्ठेपि उपमं पठमं वत्वा पच्छा अत्थो वुत्तो, इदमेव नानत्तं। छट्ठं।

७. तरुणरुक्खसुत्तवण्णना

५७-५९. सत्तमे **तरुणो**ति अजातफलो। **पलिमज्जेय्या**ति सोधेय्य। **पंसुं ददेय्या**ति थद्धफरुसपंसुं हरित्वा मुदुगोमयचुण्णमिस्सं मधुरपंसुं पक्खिपेय्य। **वुद्धि**न्ति वुद्धिं आपज्जित्वा पुप्फूपगो पुप्फं, फलूपगो फलं गण्हेय्य। इदं पनेत्थ ओपम्मसंसन्दनं – तरुणरुक्खो विय हि तेभूमकवट्टं, रुक्खजग्गको पुरिसो विय वट्टनिस्सितो पुथुज्जनो, मूलफलसन्तानादीनि विय तीहि द्वारेहि कुसलाकुसलकम्मायूहनं, रुक्खस्स वुड्ढिआपज्जनं विय पुथुज्जनस्स तीहि द्वारेहि कम्मं आयूहतो अपरापरं वट्टप्पवत्ति। विवट्टं वुत्तनयेनेव वेदितब्बं। अट्ठमनवमानि उत्तानत्थानेव। सत्तमादीनि।

१०. निदानसुत्तवण्णना

६०. दसमे **कुरूसु विहरती**ति कुरूति एवं बहुवचनवसेन लद्धवोहारे जनपदे विहरति। **कम्मासधम्मं नाम कुरूनं निगमो**ति एवंनामको कुरूनं निगमो, तं गोचरगामं कत्वाति अत्थो। **आयस्मा**ति पियवचनमेतं गरुवचनमेतं। **आनन्दो**ति तस्स थेरस्स नामं। **एकमन्तं निसीदी**ति छ निसज्जदोसे विवज्जेन्तो दक्खिणजाणुमण्डलस्स अभिमुखट्ठाने छब्बण्णानं बुद्धरस्मीनं अन्तो पविसित्वा पसन्नलाखारसं विगाहन्तो विय सुवण्णपटं पारुपन्तो विय रत्तकम्बलवितानमज्झं पविसन्तो विय धम्मभण्डागारिको आयस्मा आनन्दो निसीदि। तेन वुत्तं ''एकमन्तं निसीदी''ति।

काय पन वेलाय केन कारणेन अयमायस्मा भगवन्तं उपसङ्कमन्तोति? सायन्हवेलाय पच्चयाकारपञ्हं पुच्छनकारणेन। तं दिवसं किर अयमायस्मा कुलसङ्गहत्थाय घरद्वारे घरद्वारे सहस्सभण्डिकं निक्खिपन्तो विय कम्मासधम्मं पिण्डाय चरित्वा पिण्डपातपटिक्कन्तो सत्थु वत्तं दस्सेत्वा सत्थरि गन्धकुटिं पविट्ठे सत्थारं वन्दित्वा अत्तनो दिवाट्ठानं गन्त्वा अन्तेवासिकेसु वत्तं दस्सेत्वा पटिक्कन्तेसु दिवाट्ठानं पटिसम्मज्जित्वा चम्मक्खण्डं पञ्ञपेत्वा उदकतुम्बतो उदकेन हत्थपादे सीतलं कत्वा पल्लङ्कं आभुजित्वा निसिन्नो सोतापत्तिफलसमापत्तिं समापज्जित्वा। अथ परिच्छिन्नकालवसेन समापत्तितो वुट्ठाय पच्चयाकारे ञाणं ओतारेसि। सो ''अविज्जापच्चया सङ्खारा''तिआदितो पट्ठाय अन्तं, अन्ततो पट्ठाय आदिं, उभयन्ततो पट्ठाय मज्झं, मज्झतो पट्ठाय उभो अन्ते पापेन्तो तिक्खत्तुं द्वादसपदं पच्चयाकारं सम्मसि। तस्सेवं सम्मसन्तस्स पच्चयाकारो विभूतो हुत्वा उत्तानकुत्तानको विय उपट्ठासि। ततो चिन्तेसि — ''अयं पच्चयाकारो सब्बबुद्धेहि गम्भीरो चेव गम्भीरावभासो चाति कथितो, मय्हं खो पन पदेसञाणे ठितस्स सावकस्स सतो उत्तानो विय विभूतो पाकटो हुत्वा उपट्ठाति, मय्हंयेव नु खो एस उत्तानको विय उपट्ठाति, उदाहु अञ्ञेसम्पीति अत्तनो उपट्ठानकारणं सत्थु आरोचेस्सामी''ति निसिन्नट्ठानतो उट्ठाय चम्मक्खण्डं पप्फोटेत्वा आदाय सायन्हसमये भगवन्तं उपसङ्कमि। तेन वुत्तं — ''सायन्हवेलायं पच्चयाकारपञ्हं पुच्छनकारणेन उपसङ्कमन्तो''ति।

याव गम्भीरोति एत्थ **याव**सद्दो पमाणातिक्कमे। अतिक्कम्म पमाणं गम्भीरो, अतिगम्भीरोति अत्थो। **गम्भीरावभासो**ति गम्भीरोव हुत्वा अवभासति, दिस्सतीति अत्थो। एकञ्हि उत्तानमेव गम्भीरावभासं होति पूतिपण्णरसवसेन काळवण्णं पुराणउदकं विय। तञ्हि जाणुप्पमाणम्पि सतपोरिसं विय दिस्सति। एकं गम्भीरं उत्तानावभासं होति मणिभासं विप्पसन्नउदकं विय। तञ्हि सतपोरिसम्पि जाणुप्पमाणं विय खायति। एकं उत्तानं उत्तानावभासं होति पातिआदीसु उदकं विय। एकं गम्भीरं गम्भीरावभासं होति सिनेरुपादकमहासमुद्दे उदकं विय। एवं उदकमेव चत्तारि नामानि लभति। पटिच्चसमुप्पादे पनेतं नत्थि। अयञ्हि गम्भीरो च गम्भीरावभासो चाति एकमेव नामं लभति। एवरूपो समानोपि अथ च पन मे उत्तानकुत्तानको विय खायति, तदिदं अच्छरियं, भन्ते, अब्भुतं, भन्तेति एवं अत्तनो विम्हयं पकासेन्तो पञ्हं पुच्छित्वा तुण्हीभूतो निसीदि।

भगवा तस्स वचनं सुत्वा ''आनन्दो भवग्गगहणाय हत्थं पसारेन्तो विय सिनेरुं भिन्दित्वा मिञ्जं नीहरितुं वायममानो विय विना नावाय महासमुद्दं तरितुकामो विय पथविं परिवत्तेत्वा पथवोजं गहेतुं वायममानो विय बुद्धविसयं पञ्हं अत्तनो उत्तानुत्तानन्ति वदति, हन्दस्स गम्भीरभावं आचिक्खामी''ति चिन्तेत्वा **मा हेव**न्तिआदिमाह।

तत्थ **मा हेव**न्ति **ह**-कारो निपातमत्तं, एवं मा भणीति अत्थो। ''मा हेव''न्ति च इदं वचनं भगवा आयस्मन्तं आनन्दं उस्सादेन्तोपि भणति अपसादेन्तोपि। तत्थ उस्सादेन्तोपीति, आनन्द, त्वं महापञ्ञो विसदञाणो, तेन ते गम्भीरोपि पटिच्चसमुप्पादो उत्तानको विय खायति, अञ्ञेसं पनेस उत्तानकोति न सल्लक्खेतब्बो, गम्भीरोयेव च सो गम्भीरावभासो

च।

तत्थ चतस्सो उपमा वदन्ति – छ मासे सुभोजनरसपुट्ठस्स किर कतयोगस्स महामल्लस्स समज्जसमये कतमल्लपासाणपरिचयस्स युद्धभूमिं गच्छन्तस्स अन्तरा मल्लपासाणं दस्सेसुं। सो ''किं एत''न्ति आह। मल्लपासाणोति। आहरथ नन्ति। ''उक्खिपितुं न सक्कोमा''ति वुत्ते सयं गन्त्वा ''कुहिं इमस्स भारियट्ठान''न्ति वत्वा द्वीहि हत्थेहि द्वे पासाणे उक्खिपित्वा कीळागुळे विय खिपित्वा अगमासि। तत्थ मल्लस्स मल्लपासाणो लहुकोति न अञ्ञेसम्पि लहुकोति वत्तब्बो। छ मासे सुभोजनरसपुट्ठो मल्लो विय हि कप्पसतसहस्सं अभिनीहारसम्पन्नो आयस्मा आनन्दो। यथा मल्लस्स महाबलताय मल्लपासाणो लहुको, एवं थेरस्स महापञ्ञताय पटिच्चसमुप्पादो उत्तानोति वत्तब्बो, सो अञ्ञेसं उत्तानोति न वत्तब्बो।

महासमुद्दे च तिमि नाम महामच्छो द्वियोजनसतिको, तिमिङ्गलो तियोजनसतिको, तिमिरपिङ्गलो पञ्चयोजनसतिको, आनन्दो तिमिनन्दो अज्झारोहो महातिमीति इमे चत्तारो योजनसहस्सिका। तत्थ तिमिरपिङ्गलेनेव दीपेन्ति। तस्स किर दक्खिणकण्णं चालेन्तस्स पञ्चयोजनसते पदेसे उदकं चलति, तथा वामकण्णं, तथा नङ्गुट्ठं, तथा सीसं। द्वे पन कण्णे चालेत्वा नङ्गुट्ठेन पहरित्वा सीसं अपरापरं कत्वा कीळितुं आरद्धस्स सत्तट्ठयोजनसते ठाने भाजने पक्खिपित्वा उद्धने आरोपितं विय उदकं पक्कुथति। योजनसतमत्ते पदेसे उदकं पिट्ठिं छादेतुं न सक्कोति। सो एवं वदेय्य – ''अयं महासमुद्दो गम्भीरोति वदन्ति, कुतस्स गम्भीरता, मयं पिट्ठिमत्तच्छादनम्पि उदकं न लभामा''ति। तत्थ कायूपपन्नस्स तिमिरपिङ्गलस्स महासमुद्दो उत्तानोति अञ्ञेसञ्च खुद्दकमच्छानं उत्तानोति न वत्तब्बो, एवमेव ञाणूपपन्नस्स थेरस्स पटिच्चसमुप्पादो उत्तानोति अञ्ञेसम्पि उत्तानोति न वत्तब्बो। सुपण्णराजा च दियड्ढयोजनसतिको होति। तस्स दक्खिणपक्खो पञ्ञासयोजनिको होति, तथा वामपक्खो, पिञ्छवट्टि च सट्ठियोजनिका, गीवा तिंसयोजनिका, मुखं नवयोजनं, पादा द्वादसयोजनिका, तस्मिं सुपण्णवातं दस्सेतुं आरद्धे सत्तट्ठयोजनसतं ठानं नप्पहोति। सो एवं वदेय्य – ''अयं आकासो अनन्तोति वदन्ति, कुतस्स अनन्तता, मयं पक्खवातप्पत्थरणोकासम्पि न लभामा''ति। तत्थ कायूपपन्नस्स सुपण्णरञ्ञो आकासो परित्तोति अञ्ञेसञ्च खुद्दकपक्खीनं परित्तोति न वत्तब्बो, एवमेव ञाणूपपन्नस्स थेरस्स पटिच्चसमुप्पादो उत्तानोति अञ्ञेसम्पि उत्तानोति न वत्तब्बो।

राहु असुरिन्दो पन पादन्ततो याव केसन्ता योजनानं चत्तारि सहस्सानि अट्ठ च सतानि होन्ति। तस्स द्विन्नं बाहानं अन्तरे द्वादसयोजनसतिकं, बहलत्तेन छयोजनसतिकं, हत्थपादतलानि तियोजनसतिकानि, तथा मुखं, एकङ्गुलिपब्बं पञ्ञासयोजनं, तथा भमुकन्तरं, नलाटं तियोजनसतिकं, सीसं नवयोजनसतिकं। तस्स महासमुद्दं ओतिण्णस्स गम्भीरं उदकं जाणुप्पमाणं होति। सो एवं वदेय्य – ''अयं महासमुद्दो गम्भीरोति वदन्ति। कुतस्स गम्भीरता? मयं जाणुप्पटिच्छादनमत्तम्पि उदकं न लभामा''ति। तत्थ कायूपपन्नस्स राहुनो महासमुद्दो उत्तानोति अञ्ञेसञ्च उत्तानोति न वत्तब्बो। एवमेव ञाणूपपन्नस्स थेरस्स पटिच्चसमुप्पादो उत्तानोति अञ्ञेसम्पि उत्तानोति न वत्तब्बो। एतमत्थं सन्धाय भगवा **मा हेवं, आनन्द, मा हेवं, आनन्दा**ति आह।

थेरस्स हि चतूहि कारणेहि गम्भीरो पटिच्चसमुप्पादो उत्तानोति उपट्ठासि। कतमेहि चतूहि? पुब्बूपनिस्सयसम्पत्तिया तित्थवासेन सोतापन्नताय बहुस्सुतभावेनाति।

इतो किर सतसहस्सिमे कप्पे पदुमुत्तरो नाम सत्था लोके उप्पज्जि। तस्स हंसवती नाम नगरं अहोसि, आनन्दो नाम राजा पिता, सुमेधा नाम देवी माता, बोधिसत्तो उत्तरकुमारो नाम अहोसि। सो पुत्तस्स जातदिवसे महाभिनिक्खमनं निक्खम्म

पब्बजित्वा पधानमनुयुत्तो अनुक्कमेन सब्बञ्ञुतं पत्वा, ''अनेकजातिसंसार''न्ति उदानं उदानेत्वा सत्ताहं बोधिपल्लङ्के वीतिनामेत्वा ''पथवियं पादं ठपेस्सामी''ति पादं अभिनीहरि। अथ पथविं भिन्दित्वा महन्तं पदुमं उट्ठासि। तस्स धुरपत्तानि नवुतिहत्थानि, केसरं तिंसहत्थं, कण्णिका द्वादसहत्था, नवघटप्पमाणा रेणु अहोसि।

सत्था पन उब्बेधतो अट्ठपञ्ञासहत्थो अहोसि, तस्स उभिन्नं बाहानमन्तरं अट्ठारसहत्थं, नलाटं पञ्चहत्थं, हत्थपादा एकादसहत्था। तस्स एकादसहत्थेन पादेन द्वादसहत्थाय कण्णिकाय अक्कन्तमत्ताय नवघटप्पमाणा रेणु उट्ठाय अट्ठपञ्ञासहत्थं पदेसं उग्गन्त्वा ओकिण्णमनोसिलाचुण्णं विय पच्चोकिण्णं। तदुपादाय भगवा ''पदुमुत्तरो''त्वेव पञ्ञायित्थ। तस्स देविलो च सुजातो च द्वे अग्गसावका अहेसुं, अमिता च असमा च द्वे अग्गसाविका, सुमनो नाम उपट्ठाको। पदुमुत्तरो भगवा पितुसङ्गहं कुरुमानो भिक्खुसतसहस्सपरिवारो हंसवतिया राजधानिया वसति।

कनिट्ठभाता पनस्स सुमनकुमारो नाम। तस्स राजा हंसवतितो वीसयोजनसते भोगं अदासि। सो कदाचि आगन्त्वा पितरञ्च सत्थारञ्च पस्सति। अथेकदिवसं पच्चन्तो कुपितो। सुमनो रञ्ञो सासनं पेसेसि। राजा ''त्वं मया, तात, कस्मा ठपितो''ति पटिपेसेसि। सो चोरे वूपसमेत्वा ''उपसन्तो, देव, जनपदो''ति रञ्ञो पेसेसि। राजा तुट्ठो ''सीघं मम पुत्तो आगच्छतू''ति आह। तस्स सहस्समत्ता अमच्चा होन्ति। सो तेहि सद्धिं अन्तरामग्गे मन्तेसि – ''मय्हं पिता तुट्ठो सचे मे वरं देति, किं गण्हामी''ति? अथ नं एकच्चे ''हत्थिं गण्हथ, अस्सं गण्हथ, जनपदं गण्हथ, सत्तरतनानि गण्हथा''ति आहंसु। अपरे ''तुम्हे पथविस्सरस्स पुत्ता, न तुम्हाकं धनं दुल्लभं, लद्धम्पि चेतं सब्बं पहाय गमनीयं, पुञ्ञमेव एकं आदाय गमनीयं, तस्मा देवे वरं ददमाने तेमासं पदुमुत्तरं भगवन्तं उपट्ठातुं वरं गण्हथा''ति। सो ''तुम्हे मय्हं कल्याणमित्ता नाम, ममेतं चित्तं नत्थि, तुम्हेहि पन उप्पादितं, एवं करिस्सामी''ति, गन्त्वा पितरं वन्दित्वा पितरा आलिङ्गित्वा, मत्थके चुम्बित्वा ''वरं ते, पुत्त, देमी''ति वुत्ते ''इच्छामहं, महाराज, भगवन्तं तेमासं चतूहि पच्चयेहि उपट्ठहन्तो जीवितं अवञ्झं कातुं, इदं मे वरं देही''ति आह। न सक्का, तात, अञ्ञं वरेहीति। देव, खत्तियानं नाम द्वेकथा नत्थि, एतमेव मे देहि, न ममञ्ञेन अत्थोति। तात, बुद्धानं नाम चित्तं दुज्जानं, सचे भगवा न इच्छिस्सति, मया दिन्नम्पि किं भविस्सतीति? ''साधु, देव, अहं भगवतो चित्तं जानिस्सामी''ति विहारं गतो।

तेन च समयेन भत्तकिच्चं निट्ठापेत्वा भगवा गन्धकुटिं पविट्ठो होति। सो मण्डलमाळे सन्निसिन्नानं भिक्खूनं सन्तिकं अगमासि। ते नं आहंसु – ''राजपुत्त कस्मा आगतोसी''ति? भगवन्तं दस्सनाय, दस्सेथ मे भगवन्तन्ति। ''न मयं, राजपुत्त, इच्छितिच्छितक्खणे सत्थारं दट्ठुं लभामा''ति। को पन, भन्ते, लभतीति? सुमनत्थेरो नाम राजपुत्ताति। सो ''कुहिं भन्ते थेरो''ति? थेरस्स निसिन्नट्ठानं पुच्छित्वा गन्त्वा वन्दित्वा – ''इच्छामहं, भन्ते, भगवन्तं पस्सितुं, दस्सेथ मे भगवन्त''न्ति आह। थेरो ''एहि, राजपुत्ता''ति तं गहेत्वा गन्धकुटिपरिवेणे ठपेत्वा गन्धकुटिं आरुहि। अथ नं भगवा ''सुमन, कस्मा आगतोसी''ति आह। राजपुत्तो, भन्ते, भगवन्तं दस्सनाय आगतोति। तेन हि भिक्खु आसनं पञ्ञपेहीति। थेरो आसनं पञ्ञपेसि। निसीदि भगवा पञ्ञत्ते आसने। राजपुत्तो भगवन्तं वन्दित्वा पटिसन्थारं अकासि, ''कदा आगतोसि राजपुत्ता''ति? भन्ते, तुम्हेसु गन्धकुटिं पविट्ठेसु, भिक्खू पन ''न मयं इच्छितिच्छितक्खणे भगवन्तं दट्ठुं लभामा''ति मं थेरस्स सन्तिकं पाहेसुं, थेरो पन एकवचनेनेव दस्सेसि, थेरो, भन्ते, तुम्हाकं सासने वल्लभो मञ्ञेति। आम, राजकुमार, वल्लभो एस भिक्खु मय्हं सासनेति। भन्ते, बुद्धानं सासने किं कत्वा वल्लभो होतीति? दानं दत्वा सीलं समादियित्वा उपोसथकम्मं कत्वा, कुमाराति। भगवा अहम्पि थेरो विय बुद्धसासने वल्लभो होतुकामो, तेमासं मे वस्सावासं अधिवासेथाति। भगवा, ''अत्थि नु खो गतेन अत्थो''ति ओलोकेत्वा ''अत्थी''ति दिस्वा ''सुञ्ञागारे खो, राजकुमार, तथागता अभिरमन्ती''ति आह। कुमारो ''अञ्ञातं भगवा, अञ्ञातं सुगता''ति वत्वा – ''अहं, भन्ते, पुरिमतरं गन्त्वा विहारं कारेमि, मया पेसिते

भिक्खुसतसहस्सेन सद्धिं आगच्छथा''ति पटिञ्ञं गहेत्वा पितु सन्तिकं गन्त्वा, ''दिन्ना मे, देव, भगवता पटिञ्ञा, मया पहिते तुम्हे भगवन्तं पेसेय्याथा''ति पितरं वन्दित्वा निक्खमित्वा योजने योजने विहारं कारेत्वा वीसयोजनसतं अद्धानं गतो। गन्त्वा अत्तनो नगरे विहारट्ठानं विचिनन्तो सोभनस्स नाम कुटुम्बिकस्स उय्यानं दिस्वा सतसहस्सेन किणित्वा सतसहस्सं विस्सज्जेत्वा विहारं कारेसि। तत्थ भगवतो गन्धकुटिं, सेसभिक्खूनञ्च रत्तिट्ठानदिवाट्ठानत्थाय कुटिलेणमण्डपे कारापेत्वा पाकारपरिक्खेपं द्वारकोट्ठकञ्च निट्ठापेत्वा पितु सन्तिकं पेसेसि ''निट्ठितं मय्हं किच्चं, सत्थारं पहिणथा''ति।

राजा भगवन्तं भोजेत्वा ''भगवा सुमनस्स किच्चं निट्ठितं, तुम्हाकं आगमनं पच्चासीसती''ति। भगवा सतसहस्सभिक्खुपरिवारो योजने योजने विहारेसु वसमानो अगमासि। कुमारो ''सत्था आगच्छती''ति सुत्वा योजनं पच्चुग्गन्त्वा गन्धमालादीहि पूजयमानो विहारं पवेसेत्वा –

''सतसहस्सेन मे कीतं, सतसहस्सेन मापितं।
सोभनं नाम उय्यानं पटिग्गण्ह, महामुनी''ति॥ –

विहारं निय्यातेसि। सो वस्सूपनायिकदिवसे दानं दत्वा अत्तनो पुत्तदारे च अमच्चे च पक्कोसापेत्वा आह –''सत्था अम्हाकं सन्तिकं दूरतो आगतो, बुद्धा च नाम धम्मगरुनोव, नामिसगरुका। तस्मा अहं इमं तेमासं द्वे साटके निवासेत्वा दस सीलानि समादियित्वा इधेव वसिस्सामि, तुम्हे खीणासवसतसहस्सस्स इमिनाव नीहारेन तेमासं दानं ददेय्याथा''ति।

सो सुमनत्थेरस्स वसनट्ठानसभागेयेव ठाने वसन्तो यं थेरो भगवतो वत्तं करोति, तं सब्बं दिस्वा, ''इमस्मिं ठाने एकन्तवल्लभो एस थेरो, एतस्सेव ठानन्तरं पत्थेतुं वट्टती''ति चिन्तेत्वा, उपकट्ठाय पवारणाय गामं पविसित्वा सत्ताहं महादानं दत्वा सत्तमे दिवसे भिक्खूसतसहस्सस्स पादमूले तिचीवरं ठपेत्वा भगवन्तं वन्दित्वा, ''भन्ते, यदेतं मया मग्गे योजनन्तरिकविहारकारापनतो पट्ठाय पुञ्ञं कतं, तं नेव सक्कसम्पत्तिं, न मारब्रह्मसम्पत्तिं पत्थयन्तेन, बुद्धस्स पन उपट्ठाकभावं पत्थेन्तेन कतं। तस्मा अहम्पि भगवा अनागते सुमनत्थेरो विय एकस्स बुद्धस्स उपट्ठाको होमी''ति पञ्चपतिट्ठितेन पतित्वा वन्दित्वा निपन्नो। भगवा ''महन्तं कुलपुत्तस्स चित्तं, इज्झिस्सति नु खो, नो''ति ओलोकेन्तो, ''अनागते इतो सतसहस्सिमे कप्पे गोतमो नाम बुद्धो उप्पज्जिस्सति, तस्सेव उपट्ठाको भविस्सती''ति ञत्वा –

''इच्छितं पत्थितं तुय्हं, सब्बमेव समिज्झतु।
सब्बे पूरेन्तु सङ्कप्पा, चन्दो पन्नरसो यथा''ति॥ –

आह। कुमारो सुत्वा ''बुद्धा नाम अद्वेज्झकथा होन्ती''ति दुतियदिवसेयेव तस्स भगवतो पत्तचीवरं गहेत्वा पिट्ठितो पिट्ठितो गच्छन्तो विय अहोसि। सो तस्मिं बुद्धुप्पादे वस्ससतसहस्सं दानं दत्वा सग्गे निब्बत्तित्वा कस्सपबुद्धकालेपि पिण्डाय चरतो थेरस्स पत्तग्गहणत्थं उत्तरिसाटकं दत्वा पूजं अकासि। पुन सग्गे निब्बत्तित्वा ततो चुतो बाराणसिराजा हुत्वा अट्ठन्नं पच्चेकबुद्धानं पण्णसालायो कारेत्वा मणिआधारके उपट्ठपेत्वा चतूहि पच्चयेहि दसवस्ससहस्सानि उपट्ठानं अकासि। एतानि पाकटट्ठानानि।

कप्पसतसहस्सं पन दानं ददमानोव अम्हाकं बोधिसत्तेन सद्धिं तुसितपुरे निब्बत्तित्वा ततो चुतो अमितोदनसक्कस्स गेहे पटिसन्धिं गहेत्वा अनुपुब्बेन कताभिनिक्खमनो सम्मासम्बोधिं पत्वा पठमगमनेन कपिलवत्थुं आगन्त्वा ततो निक्खमन्ते भगवति भगवतो परिवारत्थं राजकुमारेसु पब्बजन्तेसु भद्दियादीहि सद्धिं निक्खमित्वा भगवतो सन्तिके

पब्बजित्वा नचिरस्सेव आयस्मतो पुण्णस्स मन्ताणिपुत्तस्स सन्तिके धम्मकथं सुत्वा सोतापत्तिफले पतिट्ठहि। एवमेस आयस्मा पुब्बूपनिस्सयसम्पन्नो, तस्सिमाय पुब्बूपनिस्सयसम्पत्तिया गम्भीरोपि पटिच्चसमुप्पादो उत्तानको विय उपट्ठासि।

तित्थवासोति पन गरूनं सन्तिके उग्गहणसवनपरिपुच्छनधारणानि वुच्चन्ति। सो थेरस्स अतिविय परिसुद्धो। तेनापिस्सायं गम्भीरोपि उत्तानको विय उपट्ठासि। सोतापन्नानञ्च नाम पच्चयाकारो उत्तानको हुत्वा उपट्ठाति, अयञ्च आयस्मा सोतापन्नो। बहुस्सुतानं चतुहत्थे ओवरके पदीपे जलमाने मञ्चपीठं विय नामरूपपरिच्छेदो पाकटो होति, अयञ्च आयस्मा बहुस्सुतानं अग्गो। इति **बाहुसच्चभावेन**पिस्स गम्भीरोपि पच्चयाकारो उत्तानको विय उपट्ठासि। पटिच्चसमुप्पादो चतूहि गम्भीरताहि गम्भीरो। सा पनस्स गम्भीरता विसुद्धिमग्गे वित्थारिताव। सा सब्बापि थेरस्स उत्तानका विय उपट्ठासि। तेन भगवा आयस्मन्तं आनन्दं उस्सादेन्तो **मा हेव**न्तिआदिमाह। अयञ्हेत्थ अधिप्पायो – आनन्द, त्वं महापञ्ञो विसदञाणो, तेन ते गम्भीरोपि पटिच्चसमुप्पादो उत्तानको विय खायति। तस्मा ''मय्हमेव नु खो एस उत्तानको विय हुत्वा उपट्ठाति, उदाहु अञ्ञेसम्पी''ति मा एवं अवच।

यं पन वुत्तं ''अपसादेन्तो''ति, तत्थायमधिप्पायो – आनन्द, ''अथ च पन मे उत्तानकुत्तानको विय खायती''ति मा हेवं अवच। यदि हि ते एस उत्तानकुत्तानको विय खायति, कस्मा त्वं अत्तनो धम्मताय सोतापन्नो नाहोसि, मया दिन्ननये ठत्वा सोतापत्तिमग्गं पटिविज्झि? आनन्द, इदं निब्बानमेव गम्भीरं, पच्चयाकारो पन उत्तानको जातो, अथ कस्मा ओळारिकं कामरागसंयोजनं पटिघसंयोजनं ओळारिकं कामरागानुसयं पटिघानुसयन्ति इमे चत्तारो किलेसे समुग्घातेत्वा सकदागामिफलं न सच्छिकरोसि, तेयेव अणुसहगते चत्तारो किलेसे समुग्घातेत्वा अनागामिफलं न सच्छिकरोसि, रूपरागादीनि पञ्च संयोजनानि, मानानुसयं भवरागानुसयं अविज्जानुसयन्ति इमे अट्ठ किलेसे समुग्घातेत्वा अरहत्तं न सच्छिकरोसि? कस्मा वा सतसहस्सकप्पाधिकं एकं असङ्ख्येय्यं पूरितपारमिनो सारिपुत्तमोग्गल्लाना विय सावकपारमीञाणं न पटिविज्झसि, सतसहस्सकप्पाधिकानि द्वे असङ्ख्येय्यानि पूरितपारमिनो पच्चेकबुद्धा विय च पच्चेकबोधिञाणं न पटिविज्झसि? यदि वा ते सब्बथाव एस उत्तानको हुत्वा उपट्ठासि। अथ कस्मा सतसहस्सकप्पाधिकानि चत्तारि अट्ठ सोळस वा असङ्ख्येय्यानि पूरितपारमिनो बुद्धा विय सब्बञ्ञुतञ्ञाणं न सच्छिकरोसि? किं अनत्थिकोसि एतेहि विसेसाधिगमेहि? पस्स याव च ते अपरद्धं, त्वं नाम सावकपदेसञाणे ठितो अतिगम्भीरं पच्चयाकारं ''उत्तानको विय मे उपट्ठाती''ति वदसि। तस्स ते इदं वचनं बुद्धानं कथाय पच्चनीकं होति। तादिसेन नाम भिक्खुना बुद्धानं कथाय पच्चनीकं कथेतब्बन्ति न युत्तमेतं। ननु मय्हं, आनन्द, इमं पच्चयाकारं पटिविज्झितुं वायमन्तस्सेव कप्पसतसहस्साधिकानि चत्तारि असङ्ख्येय्यानि अतिक्कन्तानि। पच्चयाकारपटिविज्झनत्थाय च पन मे अदिन्नदानं नाम नत्थि, अपूरितपारमी नाम नत्थि। ''अज्ज पच्चयाकारं पटिविज्झिस्सामी''ति पन मे निरुस्साहं विय मारबलं विधमन्तस्स अयं महापथवी द्वङ्गुलमत्तम्पि नाकम्पि, तथा पठमयामे पुब्बेनिवासं, मज्झिमयामे दिब्बचक्खुं सम्पादेन्तस्स। पच्छिमयामे पन मे बलवपच्चूससमये, ''अविज्जा सङ्खारानं नवहि आकारेहि पच्चयो होती''ति दिट्ठमत्तेयेव दससहस्सिलोकधातु अयदण्डेन आकोटितकंसथालो विय विरवसतं विरवसहस्सं मुञ्चमाना वाताहते पदुमिनिपण्णे उदकबिन्दु विय पकम्पित्थ। एवं गम्भीरो चायं, आनन्द, पटिच्चसमुप्पादो गम्भीरावभासो च, एतस्स, आनन्द, धम्मस्स अननुबोधा...पे॰... नातिवत्ततीति।

एतस्स धम्मस्साति एतस्स पच्चयधम्मस्स। **अननुबोधा**ति ञातपरिञ्ञावसेन अननुबुज्झना। **अप्पटिवेधा**ति तीरणप्पहानपरिञ्ञावसेन अप्पटिविज्झना। **तन्ताकुलकजाता**ति तन्तं विय आकुलजाता। यथा नाम दुन्निक्खित्तं मूसिकच्छिन्नं पेसकारानं तन्तं तहिं तहिं आकुलं होति, ''इदं अग्गं, इदं मूल''न्ति अग्गेन वा अग्गं, मूलेन वा मूलं समानेतुं

दुक्करं होति। एवमेव सत्ता इमस्मिं पच्चयाकारे खलिता आकुला ब्याकुला होन्ति, न सक्कोन्ति पच्चयाकारं उजुं कातुं। तत्थ तन्तं पच्चत्तपुरिसकारे ठत्वा सक्कापि भवेय्य उजुं कातुं, ठपेत्वा पन द्वे बोधिसत्ते अञ्ञो सत्तो अत्तनो धम्मताय पच्चयाकारं उजुं कातुं समत्थो नाम नत्थि। यथा पन आकुलं तन्तं कञ्जियं दत्वा कोच्छेन पहटं तत्थ तत्थ गुळकजातं होति गण्ठिबद्धं, एवमिमे सत्ता पच्चयेसु पक्खलित्वा पच्चये उजुं कातुं असक्कोन्ता द्वासट्ठिदिट्ठिगतवसेन गुळकजाता होन्ति गण्ठिबद्धा। ये हि केचि दिट्ठियो सन्निस्सिता, सब्बे ते पच्चयं उजुं कातुं असक्कोन्तायेव।

कुलागण्ठिकजाताति कुलागण्ठिकं वुच्चति पेसकारकञ्जियसुत्तं। कुला नाम सकुणिका, तस्सा कुलावकोतिपि एके। यथा हि तदुभयम्पि आकुलं अग्गेन वा अग्गं, मूलेन वा मूलं समानेतुं दुक्करन्ति पुरिमनयेनेव योजेतब्बं।

मुञ्जपब्बजभूताति मुञ्जतिणं विय पब्बजतिणं विय च भूता तादिसा जाता। यथा हि तानि तिणानि कोट्टेत्वा कतरज्जु जिण्णकाले कत्थचि पतितं गहेत्वा तेसं तिणानं ''इदं अग्गं, इदं मूल''न्ति अग्गेन वा अग्गं, मूलेन वा मूलं समानेतुं दुक्करं, तम्पि पच्चत्तपुरिसकारे ठत्वा सक्का भवेय्य उजुं कातुं, ठपेत्वा पन द्वे बोधिसत्ते अञ्ञो सत्तो अत्तनो धम्मताय पच्चयाकारं उजुं कातुं समत्थो नाम नत्थि, एवमयं पजा पच्चयं उजुं कातुं असक्कोन्ती दिट्ठिगतवसेन गण्ठिकजाता हुत्वा अपायं दुग्गतिं विनिपातं संसारं नातिवत्तति।

तत्थ **अपायो**ति निरयतिरच्छानयोनिपेत्तिविसयअसुरकाया। सब्बेपि हि ते वड्ढिसङ्खातस्स अयस्स अभावतो ''अपायो''ति वुच्चति, तथा दुक्खस्स गतिभावतो **दुग्गति,** सुखसमुस्सयतो विनिपतितत्ता **विनिपातो**। इतरो पन –

''खन्धानञ्च पटिपाटि, धातुआयतनान च।
अब्भोच्छिन्नं वत्तमाना, **संसारो**ति पवुच्चति''॥

तं सब्बम्पि नातिवत्तति नातिक्कमति, अथ खो चुतितो पटिसन्धिं, पटिसन्धितो चुतिन्ति एवं पुनप्पुनं चुतिपटिसन्धियो गण्हमाना तीसु भवेसु चतूसु योनीसु पञ्चसु गतीसु सत्तसु विञ्ञाणट्ठितीसु नवसु सत्तावासेसु महासमुद्दे वातक्खित्ता नावा विय यन्ते युत्तगोणो विय च परिब्भमतियेव। इति सब्बमेतं भगवा आयस्मन्तं आनन्दं अपसादेन्तो आह। सेसमेत्थ वुत्तनयमेवाति। दसमं।

दुक्खवग्गो छट्ठो।

७. महावग्गो

१. अस्सुतवासुत्तवण्णना

६१. महावग्गस्स पठमे **अस्सुतवा**ति खन्धधातुआयतनपच्चयाकारसतिपट्ठानादीसु उग्गहपरिपुच्छाविनिच्छयरहितो। **पुथुज्जनो**ति पुथूनं नानप्पकारानं किलेसादीनं जननादिकारणेहि पुथुज्जनो। वुत्तञ्हेतं – ''पुथु किलेसे जनेन्तीति पुथुज्जना''ति सब्बं वित्थारेतब्बं। अपिच पुथूनं गणनपथमतीतानं अरियधम्मपरम्मुखानं नीचधम्मसमाचारानं जनानं अन्तोगधत्तापि पुथुज्जनो, पुथु वा अयं विसुंयेव सङ्खं गतो, विसंसट्ठो सीलसुतादिगुणयुत्तेहि अरियेहि जनोति पुथुज्जनो। एवमेतेहि ''अस्सुतवा पुथुज्जनो''ति द्वीहिपि पदेहि ये ते –

''दुवे पुथुज्जना वुत्ता, बुद्धेनादिच्चबन्धुना।
अन्धो पुथुज्जनो एको, कल्याणेको पुथुज्जनो''ति॥ (महानि॰ ९४)। –

द्वे पुथुज्जना वुत्ता, तेसु अन्धपुथुज्जनो गहितो। **इमस्मि**न्ति पच्चुप्पन्नपच्चक्खकायं दस्सेति। **चातुमहाभूतिकस्मि**न्ति चतुमहाभूतकाये चतुमहाभूतेहि निब्बत्ते चतुमहाभूतमयेति अत्थो। **निब्बिन्देय्या**ति उक्कण्ठेय्य। **विरज्जेय्या**ति न रज्जेय्य। **विमुच्चेय्या**ति मुच्चितुकामो भवेय्य। **आचयो**ति वुड्ढि। **अपचयो**ति परिहानि। **आदान**न्ति निब्बत्ति। **निक्खेपन**न्ति भेदो।

तस्माति यस्मा इमे चत्तारो वुड्ढिहानिनिब्बत्तिभेदा पञ्ञायन्ति, तस्मा तंकारणाति अत्थो। इति भगवा चातुमहाभूतिके काये रूपं परिग्गहेतुं अयुत्तरूपं कत्वा अरूपं परिग्गहेतुं युत्तरूपं करोति। कस्मा? तेसञ्हि भिक्खूनं रूपस्मिं गाहो बलवा अधिमत्तो, तेन तेसं रूपे गाहस्स परिग्गहेतब्बरूपतं दस्सेत्वा निक्कड्ढन्तो अरूपे पतिट्ठापनत्थं एवमाह।

चित्तन्तिआदि सब्बं मनायतनस्सेव नामं। तञ्हि चित्तवत्थुताय चित्तगोचरताय सम्पयुत्तधम्मचित्तताय च **चित्तं,** मननट्ठेन **मनो,** विजाननट्ठेन **विञ्ञाण**न्ति वुच्चति। **नाल**न्ति न समत्थो। **अज्झोसित**न्ति तण्हाय गिलित्वा परिनिट्ठपेत्वा गहितं। **ममायित**न्ति तण्हाममत्तेन मम इदन्ति गहितं। **परामट्ठ**न्ति दिट्ठिया परामसित्वा गहितं। **एतं ममा**ति तण्हागाहो, तेन अट्ठसततण्हाविचरितं गहितं होति। **एसोहमस्मी**ति मानगाहो, तेन नव माना गहिता होन्ति। **एसो मे अत्ता**ति दिट्ठिगाहो, तेन द्वासट्ठि दिट्ठियो गहिता होन्ति। **तस्मा**ति यस्मा एवं दीघरत्तं गहितं, तस्मा निब्बिन्दितुं न समत्थो।

वरं, भिक्खवेति इदं कस्मा आह? पठमञ्हि तेन रूपं परिग्गहेतुं अयुत्तरूपं कतं, अरूपं युत्तरूपं, अथ ''तेसं भिक्खूनं रूपतो गाहो निक्खमित्वा अरूपं गतो''ति ञत्वा तं निक्कड्ढितुं इमं देसनं आरभि। तत्थ **अत्ततो उपगच्छेय्या**ति अत्ताति गण्हेय्य। **भिय्योपी**ति वस्ससततो उद्धम्पि। कस्मा पन भगवा एवमाह? किं अतिरेकवस्ससतं तिट्ठमानं रूपं नाम अत्थि? ननु पठमवये पवत्तं रूपं मज्झिमवयं न पापुणाति, मज्झिमवये पवत्तं पच्छिमवयं, पुरेभत्ते पवत्तं पच्छाभत्तं, पच्छाभत्ते पवत्तं पठमयामं, पठमयामे पवत्तं मज्झिमयामं, मज्झिमयामे पवत्तं पच्छिमयामं न पापुणाति? तथा गमने पवत्तं ठानं, ठाने पवत्तं निसज्जं, निसज्जाय पवत्तं सयनं न पापुणाति। एकइरियापथेपि पादस्स उद्धरणे पवत्तं अतिहरणं, अतिहरणे पवत्तं वीतिहरणं, वीतिहरणे पवत्तं वोस्सज्जनं, वोस्सज्जने पवत्तं सन्निक्खेपनं, सन्निक्खेपने पवत्तं सन्निरुज्झनं न पापुणाति, तत्थ तत्थेव ओधि ओधि पब्बं पब्बं हुत्वा तत्तकपाले पक्खित्ततिला विय पटपटायन्ता सङ्खारा भिज्जन्तीति? सच्चमेतं। यथा पन पदीपस्स जलतो जाता तं तं वट्टिप्पदेसं अनतिक्कमित्वा तत्थ तत्थेव भिज्जति, अथ च पन पवेणिसम्बन्धवसेन सब्बरत्तिं जलितो पदीपोति वुच्चति, एवमिधापि पवेणिवसेन अयम्पि कायो एवं चिरट्ठितिको विय कत्वा दस्सितो।

रत्तिया च दिवसस्स चाति रत्तिम्हि च दिवसे च। भुम्मत्थे हेतं सामिवचनं। **अञ्ञदेव उप्पज्जति, अञ्ञं निरुज्झती**ति यं रत्तिं उप्पज्जति च निरुज्झति च, ततो अञ्ञदेव दिवा उप्पज्जति च निरुज्झति चाति अत्थो। अञ्ञं उप्पज्जति, अनुप्पन्नमेव अञ्ञं निरुज्झतीति एवं पन अत्थो न गहेतब्बो। ''रत्तिया च दिवसस्स चा''ति इदं पुरिमपवेणितो परित्तकं पवेणिं गहेत्वा पवेणिवसेनेव वुत्तं, एकरत्तिं पन एकदिवसं वा एकमेव चित्तं ठातुं समत्थं नाम नत्थि। एकस्मिञ्हि अच्छराक्खणे अनेकानि चित्तकोटिसतसहस्सानि उप्पज्जन्ति। वुत्तम्पि चेतं मिलिन्दपञ्हे –

''वाहसतं खो, महाराज, वीहीनं, अड्ढचूळञ्च वाहा, वीहिसत्तम्बणानि, द्वे च तुम्बा, एकच्छराक्खणे पवत्तस्स चित्तस्स एत्तका वीही लक्खं ठपीयमाना परिक्खयं परियादानं गच्छेय्यु''न्ति।

पवनेति महावने। **तं मुञ्चित्वा अञ्ञं गण्हाति, तं मुञ्चित्वा अञ्ञं गण्हाती**ति इमिना न सो गण्हितब्बसाखं अलभित्वा भूमिं ओतरति। अथ खो तस्मिं महावने विचरन्तो तं तं साखं गण्हन्तोयेव चरतीति अयमत्थो दस्सितो।

एवमेव खोति एत्थ इदं ओपम्मसंसन्दनं – अरञ्ञमहावनं विय हि आरम्मणवनं वेदितब्बं। तस्मिं वने विचरणमक्कटो विय आरम्मणवने उप्पज्जनकचित्तं। साखागहणं विय आरम्मणे लुब्भनं। यथा सो अरञ्ञे विचरन्तो मक्कटो तं तं साखं पहाय तं तं साखं गण्हाति, एवमिदं आरम्मणवने विचरन्तं चित्तम्पि कदाचि रूपारम्मणं गहेत्वा उप्पज्जति, कदाचि सद्दादीसु अञ्ञतरं, कदाचि अतीतं, कदाचि अनागतं वा पच्चुप्पन्नं वा, तथा कदाचि अज्झत्तं, कदाचि बाहिरं। यथा च सो अरञ्ञे विचरन्तो मक्कटो साखं अलभित्वा ओरुय्ह भूमियं निसिन्नोति न वत्तब्बो, एकं पन पण्णसाखं गहेत्वाव निसीदति, एवमेव आरम्मणवने विचरन्तं चित्तम्पि एकं ओलुब्भारम्मणं अलभित्वा उप्पन्नन्ति न वत्तब्बं, एकजातियं पन आरम्मणं गहेत्वाव उप्पज्जतीति वेदितब्बं। एत्तावता च पन भगवता रूपतो नीहरित्वा अरूपे गाहो पतिट्ठापितो, अरूपतो नीहरित्वा रूपे।

इदानि तं उभयतो निक्कड्ढितुकामो **तत्र, भिक्खवे, सुतवा अरियसावको**ति देसनं आरभि। अयं पनत्थो आसीविसदट्ठूपमाय दीपेतब्बो – एको किर पुरिसो आसीविसेन दट्ठो, अथस्स विसं हरिस्सामीति छेको भिसक्को आगन्त्वा वमनं कारेत्वा हेट्ठा गरुळो, उपरि नागोति मन्तं परिवत्तेत्वा विसं उपरि आरोपेसि। सो याव अक्खिप्पदेसा आरुळ्हभावं ञत्वा "इतो परं अभिरुहितुं न दस्सामि, दट्ठट्ठानेयेव ठपेस्सामी"ति उपरि गरुळो, हेट्ठा नागोति मन्तं परिवत्तेत्वा कण्णे धुमेत्वा दण्डकेन पहरित्वा विसं ओतारेत्वा दट्ठट्ठानेयेव ठपेसि। तत्रस्स ठितभावं ञत्वा अगदलेपेन विसं निम्मथेत्वा न्हापेत्वा "सुखी होही"ति वत्वा येनकामं पक्कामि।

तत्थ आसीविसेन दट्ठस्स काये विसपतिट्ठानं विय इमेसं भिक्खूनं रूपे अधिमत्तगाहकालो, छेको भिसक्को विय तथागतो, मन्तं परिवत्तेत्वा उपरि विसस्स आरोपितकालो विय तथागतेन तेसं भिक्खूनं रूपतो गाहं नीहरित्वा अरूपे पतिट्ठापितकालो, याव अक्खिप्पदेसा आरुळ्हविसस्स उपरि अभिरुहितुं अदत्वा पुन मन्तबलेन ओतारेत्वा दट्ठट्ठानेयेव ठपनं विय सत्थारा तेसं भिक्खूनं अरूपतो गाहं नीहरित्वा रूपे पतिट्ठापितकालो। दट्ठट्ठाने ठितस्स विसस्स अगदलेपेन निम्मथनं विय उभयतो गाहं नीहरणत्थाय इमिस्सा देसनाय आरद्धकालो वेदितब्बो। तत्थ **निब्बिन्दं विरज्जती**ति इमिना मग्गो कथितो, **विरागा विमुच्चती**ति फलं, **विमुत्तस्मि**न्तिआदिना पच्चवेक्खणा। पठमं।

२. दुतियअस्सुतवासुत्तवण्णना

६२. दुतिये **सुखवेदनिय**न्ति सुखवेदनाय पच्चयं। **फस्स**न्ति चक्खुसम्फस्सादिं। ननु च चक्खुसम्फस्सो सुखवेदनाय पच्चयो न होतीति? सहजातपच्चयेन न होति, उपनिस्सयपच्चयेन पन जवनवेदनाय होति, तं सन्धायेतं वुत्तं। सोतसम्फस्सादीसुपि एसेव नयो। **तज्ज**न्ति तज्जातिकं तस्सारुप्पं, तस्स फस्सस्स अनुरूपन्ति अत्थो। **दुक्खवेदनिय**न्तिआदि वुत्तनयेनेव वेदितब्बं। **सङ्घट्टनसमोधाना**ति सङ्घट्टनेन चेव समोधानेन च, सङ्घट्टनसम्पिण्डनेनाति अत्थो। **उस्मा**ति उण्हाकारो। **तेजो अभिनिब्बत्तती**ति अग्गिचुण्णो निक्खमतीति न गहेतब्बं, उस्माकारस्सेव पन एतं वेवचनं। तत्थ **द्विन्नं कट्ठान**न्ति द्विन्नं अरणीनं। तत्थ अधोअरणी विय वत्थु, उत्तरारणी विय आरम्मणं, सङ्घट्टनं विय फस्सो, उस्माधातु विय वेदना। दुतियं।

३. पुत्तमंसूपमसुत्तवण्णना

६३. ततिये **चत्तारोमे, भिक्खवे, आहारा**तिआदि वुत्तनयमेव। यस्मा पनस्स अट्ठुप्पत्तिको निक्खेपो, तस्मा तं दस्सेत्वावेत्थ अनुपुब्बपदवण्णनं करिस्सामि। कतराय पन इदं अट्ठुप्पत्तिया निक्खित्तन्ति? लाभसक्कारेन। भगवतो किर महालाभसक्कारो उप्पज्जि, यथा तं चत्तारो असङ्ख्येय्ये पूरितदानपारमीसञ्चयस्स। सब्बदिसासु हिस्स यमकमहामेघो वुट्ठहित्वा महोघं विय सब्बपारमियो ''एकस्मिं अत्तभावे विपाकं दस्सामा''ति सम्पिण्डिता विय लाभसक्कारमहोघं निब्बत्तयिंसु। ततो ततो अन्नपानयानवत्थमालागन्धविलेपनादिहत्था खत्तियब्राह्मणादयो आगन्त्वा, ''कहं बुद्धो, कहं भगवा, कहं देवदेवो नरासभो पुरिससीहो''ति? भगवन्तं परियेसन्ति। सकटसतेहिपि पच्चये आहरित्वा ओकासं अलभमाना समन्ता गावुतप्पमाणम्पि सकटधुरेन सकटधुरं आहच्च तिट्ठन्ति चेव अनुप्पवत्तन्ति च अन्धकविन्दब्राह्मणादयो विय। सब्बं खन्धके तेसु तेसु सुत्तेसु च आगतनयेन वेदितब्बं।

यथा भगवतो, एवं भिक्खुसङ्घस्सापि। वुत्तञ्चेतं –

> ''तेन खो पन समयेन भगवा सक्कतो होति गरुकतो मानितो पूजितो अपचितो लाभी चीवर-पिण्डपात-सेनासन-गिलान-पच्चय-भेसज्ज-परिक्खारानं। भिक्खुसङ्घोपि खो सक्कतो होति...पे०... परिक्खारान''न्ति (उदा० १४; सं० नि० २.७०)।

> तथा ''यावता खो, चुन्द, एतरहि सङ्घो वा गणो वा लोके उप्पन्नो, नाहं, चुन्द, अञ्ञं एकसङ्घम्पि समनुपस्सामि एवं लाभग्गयसग्गपत्तं यथरिवायं, चुन्द, भिक्खुसङ्घो''ति (दी० नि० ३.१७६)।

स्वायं भगवतो च सङ्घस्स च उप्पन्नो लाभसक्कारो एकतो हुत्वा द्विन्नं महानदीनं उदकं विय अप्पमेय्यो अहोसि। अथ सत्था रहोगतो चिन्तेसि – ''महालाभसक्कारो अतीतबुद्धानम्पि एवरूपो अहोसि, अनागतानम्पि एवरूपो भविस्सति। किं नु खो भिक्खू आहारपरिग्गाहकेन सतिसम्पजञ्ञेन समन्नागता मज्झत्ता निच्छन्दरागा हुत्वा आहारं परिभुञ्जितुं सक्कोन्ति, न सक्कोन्ती''ति?

धम्मविनयसङ्गहं कत्वा मम सासनं पञ्चवस्ससहस्सपरिमाणकालपवत्तनकं करिस्सति, अत्तनो तं ठाने ठपेमि, एवं भिक्खू कस्सपस्स सुस्सूसितब्बं मञ्ञिस्सन्ती''ति। तस्मा एवमाह। **दुब्बचा**ति दुक्खेन वत्तब्बा। **दोवचस्सकरणेही**ति दुब्बचभावकरणेहि। **अप्पदक्खिणग्गाहिनो**ति अनुसासनिं सुत्वा पदक्खिणं न गण्हन्ति यथानुसिट्ठं न पटिपज्जन्ति, अप्पटिपज्जन्ता वामगाहिनो नाम जातााति दस्सेति। **अच्चावदन्ते**ति अतिक्कम्म वदन्ते, सुतपरियत्तिं निस्साय अतिविय वादं करोन्तेति अत्थो। **को बहुतरं भासिस्सती**ति धम्मं कथेन्तो को बहुं भासिस्सति, किं त्वं, उदाहु अहन्ति? **को सुन्दरतर**न्ति, एको बहुं भासन्तो असहितं अमधुरं भासति, एको सहितं मधुरं, तं सन्धायाह ''को सुन्दरतर''न्ति? एको पन बहुञ्च सुन्दरञ्च कथेन्तो चिरं न भासति, लहुञ्ञेव उट्ठाति, एको अद्धानं पापेति, तं सन्धायाह ''को चिरतर''न्ति? छट्ठं।

७. दुतियओवादसुत्तवण्णना

१५०. सत्तमे **सद्धा**ति ओकप्पनसद्धा। **वीरिय**न्ति कायिकचेतसिकं वीरियं। **पञ्ञा**ति कुसलधम्मजाननपञ्ञा। **न सन्ति भिक्खू ओवादका**ति इमस्स पुग्गलस्स ओवादका अनुसासका कल्याणमित्ता नत्थीति इदं, भन्ते, परिहानन्ति दस्सेति। सत्तमं।

८. ततियओवादसुत्तवण्णना

१५१. अट्ठमे **तथा हि पना**ति पुब्बे सोवचस्सताय, एतरहि च दोवचस्सताय कारणपट्ठपने निपातो। **तत्रा**ति तेसु थेरेसु। **को नामायं भिक्खू**ति को नामो अयं भिक्खु? किं तिस्सत्थेरो किं नागत्थेरोति? **तत्रा**ति तस्मिं एवं सक्कारे कयिरमाने। **तथत्ताया**ति तथाभावाय, आरञ्ञिकादिभावायाति अत्थो। **सब्रह्मचारिकामो**ति ''इमे मं परिवारेत्वा चरन्तू''ति एवं कामेति इच्छति पत्थेतीति सब्रह्मचारिकामो। **तथत्ताया**ति लाभसक्कारनिब्बत्तनत्थाय। **ब्रह्मचारुपद्दवेना**ति यो सब्रह्मचारीनं चतूसु पच्चयेसु अधिमत्तच्छन्दरागो उपद्दवोति वुच्चति, तेन उपद्दुता। **अभिपत्थना**ति अधिमत्तपत्थना। **ब्रह्मचारिअभिपत्थनेना**ति ब्रह्मचारीनं अधिमत्तपत्थनासङ्खातेन चतुपच्चयभावेन। अट्ठमं।

९. झानाभिञ्ञसुत्तवण्णना

१५२. नवमे **यावदेव आकङ्खामी**ति यावदेव इच्छामि। यानि पन इतो परं **विविच्चेव कामेही**तिआदिना नयेन चत्तारि रूपावचरज्झानानि, **सब्बसो रूपसञ्ञानं समतिक्कमा**तिआदिना नयेन चतस्सो अरूपसमापत्तियो, **सब्बसो नेवसञ्ञानासञ्ञायतनं समतिक्कम्म सञ्ञावेदयितनिरोध**न्ति एवं निरोधसमापत्ति, **अनेकविहितं इद्धिविध**न्तिआदिना नयेन पञ्च लोकिकाभिञ्ञा च वुत्ता। तत्थ यं वत्तब्बं सिया, तं सब्बं अनुपदवण्णनाय चेव भावनाविधानेन च सद्धिं विसुद्धिमग्गे (विसुद्धि० १.६९) वित्थारितमेव। छळभिञ्ञाय पन **आसवानं खया**ति आसवानं खयेन। **अनासव**न्ति आसवानं अपच्चयभूतं। **चेतोविमुत्ति**न्ति अरहत्तफलसमाधिं। **पञ्ञाविमुत्ति**न्ति अरहत्तफलपञ्ञं। नवमं।

१०. उपस्सयसुत्तवण्णना

१५३. दसमे **आयाम, भन्ते**ति कस्मा भिक्खुनीउपस्सयगमनं याचति? न लाभसक्कारहेतु, कम्मट्ठानत्थिका पनेत्थ भिक्खुनियो अत्थि, ता उस्सुक्कापेत्वा कम्मट्ठानं कथापेस्सामीति याचति। ननु च सो सयम्पि तेपिटको बहुस्सुतो, किं सयं कथेतुं न सक्कोतीति? नो न सक्कोति। बुद्धपटिभागस्स पन सावकस्स कथं सद्धातब्बं मञ्ञिस्सन्तीति याचति।

बहुकिच्चो त्वं बहुकरणीयोति किं थेरो नवकम्मादिपसुतो, येन नं एवमाहाति? नो, सत्थरि पन परिनिब्बुते चतस्सो परिसा आनन्दत्थेरं उपसङ्कमित्वा, ''भन्ते, इदानि कस्स पत्तचीवरं गहेत्वा चरथ, कस्स परिवेणं सम्मज्जथ, कस्स मुखोदकं देथा''ति रोदन्ति परिदेवन्ति। थेरो ''अनिच्चा सङ्खारा, वुद्धसरीरेपि निल्लज्जोव मच्चुराजा पहरि। एसा सङ्खारानं धम्मता, मा सोचित्थ, मा परिदेवित्था''ति परिसं सञ्ञापेति। इदमस्स बहुकिच्चं। तं सन्धाय थेरो एवमाह। **सन्दस्सेसी**ति पटिपत्तिगुणं दस्सेसि। **समादपेसी**ति गण्हापेसि। **समुत्तेजेसी**ति समुस्साहेसि। **सम्पहंसेसी**ति पटिलद्धगुणेन मोदापेसि।

थुल्लतिस्साति सरीरेन थूला, नामेन तिस्सा। **वेदेहमुनिनो**ति पण्डितमुनिनो। पण्डितो हि ञाणसङ्खातेन वेदेन ईहति सब्बकिच्चानि करोति, तस्मा ''वेदेहो''ति वुच्चति। वेदेहो च सो मुनि चाति, वेदेहमुनि। **धम्मं भासितब्बं मञ्ञती**ति तिपिटकधरस्स धम्मभण्डागारिकस्स सम्मुखे सयं अरञ्ञवासी पंसुकूलिको समानो ''धम्मकथिको अहं''न्ति धम्मं भासितब्बं मञ्ञति। इदं किं पन, कथं पनाति? अवजानमाना भणति। **अस्सोसी**ति अञ्ञेन आगन्त्वा आरोचितवसेन अस्सोसि। **आगमेहि त्वं, आवुसो**ति तिट्ठ त्वं, आवुसो। **मा ते सङ्घो उत्तरि उपपरिक्खी**ति मा भिक्खुसङ्घो अतिरेकओकासे तं उपपरिक्खीति। इदं वुत्तं होति – ''आनन्देन बुद्धपटिभागो सावको वारितो, एका भिक्खुनी न वारिता, ताय सद्धिं सन्थवो वा सिनेहो वा भविस्सती''ति मा तं सङ्घो एवं अमञ्ञीति।

इदानि अत्तनो बुद्धपटिभागभावं दीपेन्तो **तं किं मञ्ञसि, आवुसो**तिआदिमाह? **सत्तरतन**न्ति सत्तहत्थप्पमाणं। **नाग**न्ति हत्थिं। **अड्ढट्ठरतनं वा**ति अड्ढरतनेन ऊनअट्ठरतनं, पुरिमपादतो पट्ठाय याव कुम्भा विदत्थाधिकसत्तहत्थुब्बेधन्ति अत्थो। **तालपत्तिकाया**ति तरुणतालपण्णेन। **चवित्था**ति चुता, न मता वा नट्ठा वा, बुद्धपटिभागस्स पन सावकस्स उपवादं वत्वा महाकस्सपत्थेरे छहि अभिञ्ञाहि सीहनादं नदन्ते तस्सा कासावानि कण्टकसाखा विय कच्छुसाखा विय च सरीरं खादितुं आरद्धानि, तानि हारेत्वा सेतकानि निवत्थक्खणेयेवस्सा चित्तस्सादो उदपादीति। दसमं।

११. चीवरसुत्तवण्णना

१५४. एकादसमे **दक्खिणागिरिस्मि**न्ति राजगहं परिवारेत्वा ठितस्स गिरिनो दक्खिणभागे जनपदो दक्खिणागिरि नाम, तस्मिं चारिकं चरतीति अत्थो। चारिका च नाम दुविधा होति तुरितचारिका च अतुरितचारिका च। तत्थ यं एकच्चो एकं कासावं निवासेत्वा एकं पारुपित्वा पत्तचीवरं अंसे लग्गेत्वा छत्तं आदाय सरीरतो सेदेहि पग्घरन्तेहि दिवसेन सत्तट्ठयोजनानि गच्छति, यं वा पन बुद्धा किञ्चिदेव बोधनेय्यसत्तं दिस्वा योजनसतम्पि योजनसहस्सम्पि खणेन गच्छन्ति, एसा **तुरितचारिका** नाम। देवसिकं पन गावुतं अड्ढयोजनं तिगावुतं योजनन्ति एत्तकं अद्धानं अज्जतनाय निमन्तनं अधिवासयतो जनसङ्गहं करोतो गमनं, एसा **अतुरितचारिका** नाम। अयं इध अधिप्पेता।

ननु च थेरो पञ्चवीसति वस्सानि छाया विय दसबलस्स पच्छतो पच्छतो गच्छन्तोव अहोसि, ''कहं आनन्दो''ति वचनस्स ओकासमेव न अदासि, सो किस्मिं काले भिक्खुसङ्घेन सद्धिं चारिकं चरितुं ओकासं लभतीति? सत्थु परिनिब्बानसंवच्छरे। परिनिब्बुते किर सत्थरि महाकस्सपत्थेरो सत्थु परिनिब्बाने सन्निपतितस्स भिक्खुसङ्घस्स मज्झे निसीदित्वा धम्मविनयसङ्गायनत्थं पञ्चसते भिक्खू उच्चिनित्वा, ''आवुसो, मयं राजगहे वस्सं वसन्ता धम्मविनयं सङ्गायिस्साम, तुम्हे पुरे वस्सूपनायिकाय अत्तनो पलिबोधं उच्छिन्दित्वा राजगहे सन्निपतथा''ति वत्वा अत्तना राजगहं गतो। आनन्दत्थेरोपि भगवतो पत्तचीवरं आदाय महाजनं सञ्ञापेन्तो सावत्थिं गन्त्वा ततो निक्खम्म राजगहं गच्छन्तो दक्खिणागिरिस्मिं चारिकं चरि। तं सन्धायेतं वुत्तं।

येभुय्येन कुमारभूताति ये ते हीनायावत्ता नाम, ते येभुय्येन कुमारका दहरा तरुणा एकवस्सिकद्वेवस्सिका भिक्खू चेव अनुपसम्पन्नकुमारका च। कस्मा पनेते पब्बजिता, कस्मा हीनायावत्ताति? तेसं किर मातापितरो चिन्तेसुं – ''आनन्दत्थेरो सत्थु विस्सासिको अट्ठ वरे याचित्वा उपट्ठहति, इच्छितिच्छितट्ठानं सत्थारं गहेत्वा गन्तुं सक्कोति, अम्हाकं दारके एतस्स सन्तिके पब्बाजेम, सो सत्थारं गहेत्वा आगमिस्सति, तस्मिं आगते मयं महासक्कारं कातुं लभिस्सामा''ति। इमिना ताव कारणेन नेसं ञातका ते पब्बाजेसुं। सत्थरि पन परिनिब्बुते तेसं सा पत्थना उपच्छिन्ना, अथ ते एकदिवसेनेव उप्पब्बाजेसुं।

यथाभिरन्तन्ति यथारुचिया यथाअज्झासयेन। **तिकभोजनं पञ्ञत्त**न्ति, इदं ''गणभोजने अञ्ञत्र समया पाचित्तिय''न्ति (पाचि॰ २११)। इदं सन्धाय वुत्तं। तत्थ हि तिण्णं जनानं अकप्पियनिमन्तनं सादियित्वा एकतो पटिग्गण्हन्तानम्पि अनापत्ति, तस्मा ''तिकभोजन''न्ति वुत्तं।

दुम्मङ्कूनं पुग्गलानं निग्गहायाति दुस्सीलपुग्गलानं निग्गण्हनत्थं। **पेसलानं भिक्खूनं फासुविहाराया**ति दुम्मङ्कूनं निग्गहेनेव पेसलानं उपोसथपवारणा वत्तन्ति, समग्गवासो होति, अयं तेसं फासुविहारो होति, इमस्स फासुविहारस्स अत्थाय। **मा पापिच्छा पक्खं निस्साय सङ्घं भिन्देय्यु**न्ति यथा देवदत्तो सपरिसो कुलेसु विञ्ञापेत्वा भुञ्जन्तो पापिच्छे निस्साय सङ्घं भिन्दि, एवं अञ्ञेपि पापिच्छा गणबन्धेन कुलेसु विञ्ञापेत्वा भुञ्जमाना गणं वड्ढेत्वा तं पक्खं निस्साय मा सङ्घं भिन्देय्युन्ति, इति इमिना कारणेन पञ्ञत्तन्ति अत्थो। **कुलानुद्दयताय चा**ति भिक्खुसङ्घे उपोसथपवारणं कत्वा समग्गवासं वसन्ते मनुस्सा सलाकभत्तादीनि दत्वा सग्गपरायणा भवन्ति, इति इमाय कुलानुद्दयताय च पञ्ञत्तन्ति अत्थो।

सस्सघातं मञ्ञे चरसीति सस्सं घातेन्तो विय आहिण्डसि। **कुलूपघातं मञ्ञे चरसी**ति कुलानि उपघातेन्तो विय हनन्तो विय आहिण्डसि। **ओलुज्जती**ति विसेसेन पलुज्जति भिज्जति। **पलुज्जन्ति खो ते, आवुसो, नवप्पाया**ति, आवुसो, एते तुय्हं पायेन येभुय्येन नवका एकवस्सिकदुवस्सिका दहरा चेव सामणेरा च पलुज्जन्ति भिज्जन्ति। **न वायं कुमारको मत्तमञ्ञासी**ति अयं कुमारको अत्तनो पमाणं न जानातीति थेरं तज्जेन्तो आह।

कुमारकवादा न मुच्चामाति कुमारकवादतो न मुच्चाम। **तथा हि पन त्व**न्ति इदमस्स एवं वत्तब्बताय कारणदस्सनत्थं वुत्तं। अयञ्हेत्थ अधिप्पायो – यस्मा त्वं इमेहि नवेहि भिक्खूहि इन्द्रियसंवररहितेहि सद्धिं विचरसि, तस्मा कुमारकेहि सद्धिं विचरन्तो कुमारकोति वत्तब्बतं अरहसीति।

अञ्ञतित्थियपुब्बो समानोति इदं यस्मा थेरस्स इमस्मिं सासने नेव आचरियो न उपज्झायो पञ्ञायति, सयं कासायानि गहेत्वा निक्खन्तो, तस्मा अनत्तमनताय अञ्ञतित्थियपुब्बतं आरोपयमाना आह।

सहसाति एत्थ रागमोहचारोपि सहसाचारो, इदं पन दोसचारवसेन वुत्तं। **अप्पटिसङ्खा**ति अप्पच्चवेक्खित्वा, इदानि अत्तनो पब्बज्जं सोधेन्तो **यत्वाहं, आवुसो**तिआदिमाह। तत्थ **अञ्ञं सत्थारं उद्दिसितु**न्ति ठपेत्वा भगवन्तं अञ्ञं मय्हं सत्थाति एवं उद्दिसितुं न जानामि। **सम्बाधो घरावासो**तिआदीसु सचेपि सट्ठिहत्थे घरे योजनसतन्तरेपि वा द्वे जायम्पतिका वसन्ति, तथापि तेसं सकिञ्चनसपलिबोधट्ठेन घरावासो सम्बाधोयेव। **रजापथो**ति रागरजादीनं उट्ठानट्ठानन्ति महाअट्ठकथायं वुत्तं। ''आगमनपथो''तिपि वत्तुं वट्टति। अलग्गनट्ठेन अब्भोकासो वियाति **अब्भोकासो**। पब्बजितो हि कूटागाररतनमयपासाददेवविमानादीसु पिहितद्वारवातपानेसु पटिच्छन्नेसु वसन्तोपि नेव लग्गति न सज्जति न बज्झति, तेन वुत्तं ''अब्भोकासो पब्बज्जा''ति। अपिच **सम्बाधो घरावासो** कुसलकिरियाय ओकासाभावतो **रजापथो** असंवुतसङ्कारट्ठानं विय रजानं, किलेसरजानं सन्निपातट्ठानतो, **अब्भोकासो पब्बज्जा** कुसलकिरियाय यथा सुखं

ओकाससम्भावतो।

नयिदं सुकरं...पे०... पब्बजेय्यन्ति एत्थ अयं सङ्खेपकथा – यदेतं सिक्खत्तयब्रह्मचरियं एकम्पि दिवसं अखण्डं कत्वा चरिमकचित्तं पापेतब्बताय **एकन्तपरिपुण्णं** चरितब्बं, एकदिवसम्पि च किलेसमलेन अमलीनं कत्वा चरिमकचित्तं पापेतब्बताय **एकन्तपरिसुद्धं, सङ्खलिखितं** लिखितसङ्खसदिसं धोतसङ्खसप्पटिभागं चरितब्बं, इदं न सुकरं अगारं अज्झावसता अगारमज्झे वसन्तेन एकन्तपरिपुण्णं...पे०... चरितुं, यंनूनाहं केसमस्सुं ओहारेत्वा कसायरसपीतताय कासायानि ब्रह्मचरियं चरन्तानं अनुच्छविकानि वत्थानि अच्छादेत्वा परिदहित्वा अगारस्मा निक्खमित्वा अनगारियं पब्बज्जेय्यन्ति। एत्थ च यस्मा अगारस्स हितं कसिवणिज्जादिकम्मं **अगारिय**न्ति वुच्चति, तं पब्बज्जाय नत्थि, तस्मा पब्बज्जा अनगारियाति ञातब्बा, तं अनगारियं। **पब्बजेय्य**न्ति पटिपज्जेय्यं।

पटपिलोतिकानन्ति जिण्णपिलोतिकानं तेरसहत्थोपि हि नवसाटको दसानं छिन्नकालतो पट्ठाय पिलोतिकाति वुच्चति। इति महारहानि वत्थानि छिन्दित्वा कतं सङ्घाटिं सन्धाय ''पटपिलोतिकानं सङ्घाटि''न्ति वुत्तं। **अद्धानमग्गप्पटिपन्नो**ति अड्ढयोजनतो पट्ठाय मग्गो अद्धानन्ति वुच्चति, तं अद्धानमग्गं पटिपन्नो, दीघमग्गं पटिपन्नोति अत्थो।

इदानि यथा एस पब्बजितो, यथा च अद्धानमग्गं पटिपन्नो, इमस्सत्थस्स आविभावत्थं अभिनीहारतो पट्ठाय अनुपुब्बिकथा कथेतब्बा – अतीते किर कप्पसतसहस्समत्थके पदुमुत्तरो नाम सत्था उदपादि, तस्मिं हंसवतीनगरं उपनिस्साय खेमे मिगदाये विहरन्ते वेदेहो नाम कुटुम्बिको असीतिकोटिधनविभवो पातोव सुभोजनं भुञ्जित्वा उपोसथङ्गानि अधिट्ठाय गन्धपुप्फादीनि गहेत्वा विहारं गन्त्वा सत्थारं पूजेत्वा वन्दित्वा एकमन्तं निसीदि। तस्मिं खणे सत्था महानिसभत्थेरं नाम ततियसावकं ''एतदग्गं, भिक्खवे, मम सावकानं भिक्खूनं धुतवादानं यदिदं निसभो''ति एतदग्गे ठपेसि। उपासको तं सुत्वा पसन्नो धम्मकथावसाने महाजने उट्ठाय गते सत्थारं वन्दित्वा, ''भन्ते, स्वे मय्हं भिक्खं अधिवासेथा''ति आह। महा खो, उपासक, भिक्खुसङ्घोति। कित्तको भगवाति। अट्ठसट्ठिभिक्खुसतसहस्सन्ति। भन्ते, एकं सामणेरम्पि विहारे असेसेत्वा भिक्खं अधिवासेथाति। सत्था अधिवासेसि। उपासको सत्थु अधिवासनं विदित्वा गेहं गन्त्वा महादानं सज्जेत्वा पुनदिवसे सत्थु कालं आरोचापेसि। सत्था पत्तचीवरमादाय भिक्खुसङ्घपरिवुतो उपासकस्स घरं गन्त्वा पञ्ञत्तासने निसिन्नो दक्खिणोदकावसाने यागुभत्तादीनि सम्पटिच्छन्तो भत्तविस्सग्गं अकासि। उपासकोपि सत्थु सन्तिके निसीदि।

तस्मिं अन्तरे महानिसभत्थेरो पिण्डाय चरन्तो तमेव वीथिं पटिपज्जि। उपासको दिस्वा उट्ठाय गन्त्वा थेरं वन्दित्वा ''पत्तं, भन्ते, नो देथा''ति आह। थेरो पत्तं अदासि। भन्ते, इधेव पविसथ, सत्थापि गेहे निसिन्नोति। न वट्टिस्सति उपासकाति। उपासको थेरस्स पत्तं गहेत्वा पिण्डपातस्स पूरेत्वा नीहरित्वा अदासि। ततो थेरं अनुगन्त्वा निवत्तो सत्थु सन्तिके निसीदित्वा एवमाह – ''भन्ते, महानिसभत्थेरो 'सत्था गेहे निसिन्नो'ति वुत्तेपि पविसितुं न इच्छि, अत्थि नु खो एतस्स तुम्हाकं गुणेहि अतिरेको गुणो''ति। बुद्धानञ्च वण्णमच्छेरं नाम नत्थि। अथ सत्था एवमाह – ''उपासक, मयं भिक्खं आगमयमाना गेहे निसीदाम, सो भिक्खु न एवं निसीदित्वा भिक्खं उदिक्खति। मयं गामन्तसेनासने वसाम, सो अरञ्ञस्मिंयेव वसति। मयं छन्ने वसाम, सो अब्भोकासम्हियेव वसति। इति तस्स अयञ्च अयञ्च गुणो''ति महासमुद्दं पूरयमानोव कथेसि। उपासको पकतियापि जलमानदीपो तेलेन आसित्तो विय सुट्ठुतरं पसन्नो हुत्वा चिन्तेसि – ''किं मय्हं अञ्ञाय सम्पत्तिया, अनागते एकस्स बुद्धस्स सन्तिके धुतवादानं अग्गभावत्थाय पत्थनं करिस्सामी''ति?

सो पुनपि सत्थारं निमन्तेत्वा तेनेव नियामेन सत्त दिवसानि दानं दत्वा सत्तमे दिवसे अट्ठसट्ठिभिक्खुसतसहस्सस्स तिचीवरानि दत्वा सत्थु पादमूले निपज्जित्वा एवमाह – ''यं मे, भन्ते, सत्त दिवसानि दानं देन्तस्स मेत्तं कायकम्मं मेत्तं वचीकम्मं मेत्तं मनोकम्मं, इमिनाहं न अञ्ञं देवसम्पत्तिं वा सक्कमारब्रह्मसम्पत्तिं वा पत्थेमि, इदं पन मे कम्मं अनागते एकस्स बुद्धस्स सन्तिके महानिसभत्थेरेन पत्तट्ठानन्तरं पापुणनत्थाय तेरसधुतङ्गधरानं अग्गभावस्स पच्चयो होतू''ति। सत्था ''महन्तं ठानं इमिना पत्थितं, समिज्झिस्सति नु खो''ति ओलोकेन्तो समिज्झनभावं दिस्वा आह – ''मनापं ते ठानं पत्थितं, अनागते सतसहस्सकप्पमत्थके गोतमो नाम बुद्धो उप्पज्जिस्सति, तस्स त्वं ततियसावको महाकस्सपत्थेरो नाम भविस्ससी''ति। तं सुत्वा उपासको ''बुद्धानं द्वे कथा नाम नत्थी''ति पुनदिवसे पत्तब्बं विय तं सम्पत्तिं अमञ्ञित्थ। सो यावतायुकं सीलं रक्खित्वा तत्थ कालङ्कतो सग्गे निब्बत्ति।

ततो पट्ठाय देवमनुस्सेसु सम्पत्तिं अनुभवन्तो इतो एकनवुतिकप्पे विपस्सिम्हि सम्मासम्बुद्धे बन्धुमतीनगरं निस्साय खेमे मिगदाये विहरन्ते देवलोका चवित्वा अञ्ञतरस्मिं परिजिण्णे ब्राह्मणकुले निब्बत्ति। तस्मिञ्च काले ''विपस्सी भगवा सत्तमे सत्तमे संवच्छरे धम्मं कथेती''ति महन्तं कोलाहलं होति। सकलजम्बुदीपे देवता ''सत्था धम्मं कथेस्सती''ति आरोचेन्ति, ब्राह्मणो तं सासनं अस्सोसि। तस्स च निवासनसाटको एको होति, तथा ब्राह्मणिया, पारुपनं पन द्विन्नम्पि एकमेव। सकलनगरे ''एकसाटकब्राह्मणो''ति पञ्ञायति। ब्राह्मणानं केनचिदेव किच्चेन सन्निपाते सति ब्राह्मणिं गेहे ठपेत्वा सयं गच्छति, ब्राह्मणीनं सन्निपाते सति सयं गेहे तिट्ठति, ब्राह्मणी तं वत्थं पारुपित्वा गच्छति। तस्मिं पन दिवसे ब्राह्मणो ब्राह्मणिं आह – ''भोति, किं रत्तिं धम्मस्सवनं सुणिस्ससि दिवा''ति? ''मयं मातुगामजातिका नाम रत्तिं सोतुं न सक्कोम, दिवा सोस्सामी''ति ब्राह्मणं गेहे ठपेत्वा वत्थं पारुपित्वा उपासिकाहि सद्धिं दिवा गन्त्वा सत्थारं वन्दित्वा एकमन्ते निसिन्ना धम्मं सुत्वा उपासिकाहियेव सद्धिं आगमासि। अथ ब्राह्मणो ब्राह्मणिं गेहे ठपेत्वा वत्थं पारुपित्वा विहारं गतो।

तस्मिं च समये सत्था परिसमज्झे अलङ्कतधम्मासने सन्निसिन्नो चित्तबीजनिं आदाय आकासगङ्गं ओतारेन्तो विय सिनेरुं मत्थं कत्वा सागरं निम्मथेन्तो विय धम्मकथं कथेति। ब्राह्मणस्स परिसन्ते निसिन्नस्स धम्मं सुणन्तस्स पठमयामस्मिंयेव सकलसरीरं पूरयमाना पञ्चवण्णा पीति उप्पज्जि। सो पारुतवत्थं सङ्घरित्वा ''दसबलस्स दस्सामी''ति चिन्तेसि। अथस्स आदीनवसहस्सं दस्सयमानं मच्छेरं उप्पज्जि, सो ''ब्राह्मणिया च मय्हञ्च एकमेव वत्थं, अञ्ञं किञ्चि पारुपनं नत्थि, अपारुपित्वा च नाम बहि चरितुं न सक्का''ति सब्बथापि अदातुकामो अहोसि। अथस्स निक्खन्ते पठमयामे मज्झिमयामेपि तथेव पीति उप्पज्जि, सो तथेव च चिन्तेत्वा तथेव अदातुकामो अहोसि। अथस्स मज्झिमयामे निक्खन्ते पच्छिमयामेपि तथेव पीति उप्पज्जि, सो ''तरणं वा होतु मरणं वा, पच्छापि जानिस्सामी''ति वत्थं सङ्घरित्वा सत्थु पादमूले ठपेसि। ततो वामहत्थं आभुजित्वा दक्खिणेन हत्थेन तिक्खत्तुं अप्फोटेत्वा ''जितं मे जितं मे''ति तयो वारे नदि।

तस्मिञ्च समये बन्धुमराजा धम्मासनस्स पच्छतो अन्तोसाणियं निसिन्नो धम्मं सुणाति। रञ्ञो च नाम ''जितं मे''ति सद्दो अमनापो होति। सो पुरिसं पेसेसि ''गच्छ एतं पुच्छ किं वदेसी''ति? सो तेन गन्त्वा पुच्छितो आह – ''अवसेसा हत्थियानादीनि आरुय्ह असिचम्मादीनि गहेत्वा परसेनं जिनन्ति, न तं अच्छरियं, अहं पन पच्छतो आगच्छन्तस्स कूटगोणस्स मुग्गरेन सीसं भिन्दित्वा तं पलापेन्तो विय मच्छेरचित्तं मद्दित्वा पारुतवत्थं दसबलस्स अदासिं, तं मे मच्छरियं जित''न्ति आह। पुरिसो गन्त्वा तं पवत्तिं रञ्ञो आरोचेसि। राजा आह – ''अम्हे भणे दसबलस्स अनुरूपं न जानिम्हा, ब्राह्मणो पन जानी''ति वत्थयुगम्पि पेसेसि। तं दिस्वा ब्राह्मणो चिन्तेसि – ''अयं मय्हं तुण्ही निसिन्नस्स पठमं किञ्चि अदत्वा सत्थु गुणे कथेन्तस्स अदासि, सत्थु गुणे पटिच्च उप्पन्नेन मय्हं को अत्थो''ति तम्पि वत्थयुगं दसबलस्सेव अदासि। राजा ''किं ब्राह्मणेन कत''न्ति? पुच्छित्वा, ''तम्पि तेन वत्थयुगं तथागतस्सेव दिन्न''न्ति सुत्वा अञ्ञानि द्वे

वत्थयुगानि पेसेसि। सो तानिपि अदासि। राजा अञ्ञानिपि चत्तारीति एवं याव द्वत्तिंस वत्थयुगानि पेसेसि। अथ ब्राह्मणो ''इदं वड्ढेत्वा गहणं विय होती''ति अत्तनो अत्थाय एकं ब्राह्मणिया अत्थाय एकन्ति द्वे वत्थयुगानि गहेत्वा तिंस युगानि तथागतस्सेव अदासि। ततो पट्ठाय च सत्थु विस्सासिको जातो।

अथ नं राजा एकदिवसं सीतसमये सत्थु सन्तिके धम्मं सुणन्तं दिस्वा सतसहस्सग्घनिकं अत्तनो पारुतं रत्तकम्बलं दत्वा आह – ''इतो पट्ठाय इदं पारुपित्वा धम्मं सुणाही''ति। सो ''किं मे इमिना कम्बलेन इमस्मिं पूतिकाये उपनीतेना''ति? चिन्तेत्वा, अन्तोगन्धकुटियं तथागतमञ्चस्स उपरि वितानं कत्वा अगमासि। अथ एकदिवसं राजा पातोव विहारं गन्त्वा अन्तोगन्धकुटियं सत्थु सन्तिके निसीदि। तस्मिञ्च समये छब्बण्णा बुद्धरस्मियो कम्बलं पटिहञ्ञन्ति, कम्बलो अतिविय विरोचति। राजा उद्धं ओलोकेन्तो सञ्जानित्वा आह – ''भन्ते, अम्हाकं एस कम्बलो, अम्हेहि एकसाटकब्राह्मणस्स दिन्नो''ति। तुम्हेहि, महाराज, ब्राह्मणो पूजितो, ब्राह्मणेन अहं पूजितोति। राजा ''ब्राह्मणो युत्तकं अञ्ञासि, न मय''न्ति पसीदित्वा यं मनुस्सानं उपकारभूतं, तं सब्बं अट्ठट्ठकं कत्वा सब्बट्ठकं नाम दानं दत्वा पुरोहितट्ठाने ठपेसि। सोपि ''अट्ठट्ठकं नाम चतुसट्ठि होती''ति चतुसट्ठि सलाकभत्तानि उपनिबन्धापेत्वा यावजीवं दानं दत्वा सीलं रक्खित्वा ततो चुतो सग्गे निब्बत्ति।

पुन ततो चुतो इमस्मिं कप्पे कोणागमनस्स च भगवतो कस्सपदसबलस्स चाति द्विन्नं बुद्धानं अन्तरे बाराणसियं कुटुम्बियघरे निब्बत्तो, सो वुद्धिमन्वाय घरावासं वसन्तो एकदिवसं अरञ्ञे जङ्घविहारं चरति। तस्मिञ्च समये पच्चेकबुद्धो नदीतीरे चीवरकम्मं करोन्तो अनुवाते अप्पहोन्ते सङ्घरित्वा ठपेतुं आरद्धो। सो दिस्वा, ''कस्मा, भन्ते, सङ्घरित्वा ठपेथा''ति? आह। अनुवातो नप्पहोतीति। ''इमिना, भन्ते, करोथा''ति साटकं दत्वा, ''निब्बत्तनिब्बत्तट्ठाने मे केनचि परिहानि मा होतू''ति पत्थनं पट्ठपेसि। घरेपिस्स भगिनिया सद्धिं भरियाय कलहं करोन्तिया पच्चेकबुद्धो पिण्डाय पाविसि।

अथस्स भगिनी पच्चेकबुद्धस्स पिण्डपातं दत्वा तस्स भरियं सन्धाय ''एवरूपं बालं योजनसतेन परिवज्जेय्य''न्ति पत्थनं पट्ठपेसि। सा गेहद्वारे ठिता तं सुत्वा, ''इमाय दिन्नं भत्तं एस मा भुञ्जतू''ति पत्तं गहेत्वा पिण्डपातं छड्डेत्वा कललस्स पूरेत्वा अदासि। इतरा दिस्वा, ''बाले मं ताव अक्कोस वा पहर वा। एवरूपस्स पन द्वे असङ्ख्येय्यानि पूरितपारमिस्स पत्ततो भत्तं छड्डेत्वा कललं दातुं न युत्त''न्ति आह। अथस्स भरियाय पटिसङ्खानं उप्पज्जि। सा ''तिट्ठथ, भन्ते''ति कललं छड्डेत्वा पत्तं धोवित्वा गन्धचुण्णेन उब्बट्टेत्वा पवरस्स चतुमधुरस्स पूरेत्वा उपरि आसित्तेन पदुमगब्भवण्णेन सप्पिना विज्जोतमानं पच्चेकबुद्धस्स हत्थे ठपेत्वा, ''यथा अयं पिण्डपातो ओभासजातो, एवं ओभासजातं मे सरीरं होतू''ति पत्थनं पट्ठपेसि। पच्चेकबुद्धो अनुमोदित्वा आकासं पक्खन्दि। तेपि जायम्पतिका यावतायुकं कुसलं कत्वा सग्गे निब्बत्तित्वा पुन ततो चवित्वा उपासको बाराणसियं असीतिकोटिविभवस्स सेट्ठिनो पुत्तो हुत्वा निब्बत्ति, इतरा तादिसस्सेव धीता हुत्वा निब्बत्ति।

तस्स वुद्धिप्पत्तस्स तमेव सेट्ठिधीतरं आनयिंसु। तस्सा पुब्बे अदिन्नविपाकस्स तस्स कम्मस्स आनुभावेन पतिकुलं पविट्ठमत्ताय उम्मारब्भन्तरे सकलसरीरं उग्घाटितवच्चकुटि विय दुग्गन्धं जातं। सेट्ठिकुमारो ''कस्सायं गन्धो''ति पुच्छित्वा ''सेट्ठिकञ्ञाया''ति सुत्वा ''नीहरथ नीहरथा''ति आभतनियामेनेव कुलघरं पेसेसि। सा एतेनेव नीहारेन सत्तसु ठानेसु पटिनिवत्तिता चिन्तेसि – ''अहं सत्तसु ठानेसु पटिनिवत्ता। किं मे जीवितेना''ति? अत्तनो आभरणभण्डं भञ्जापेत्वा सुवण्णिट्ठकं कारेसि रतनायतं विदत्थिवित्थतं चतुरङ्गुलुब्बेधं। ततो हरितालमनोसिलापिण्डं गहेत्वा अट्ठ उप्पलहत्थके आदाय कस्सपदसबलस्स चेतियकरणट्ठानं गता। तस्मिञ्च खणे एका इट्ठकपन्ति परिक्खिपित्वा आगच्छमाना घटनिट्ठकाय ऊना होति। सेट्ठिधीता वड्ढकिं आह – ''इमं इट्ठकं एत्थ ठपेथा''ति। अम्म, भद्दके काले आगतासि, सयमेव

ठपेहीति। सा आरुय्ह तेलेन हरितालमनोसिलं योजेत्वा तेन बन्धनेन इट्ठकं पतिट्ठपेत्वा उपरि अट्ठहि उप्पलहत्थकेहि पूजं कत्वा वन्दित्वा, ''निब्बत्तनिब्बत्तट्ठाने मे कायतो चन्दनगन्धो वायतु, मुखतो उप्पलगन्धो''ति पत्थनं कत्वा, चेतियं वन्दित्वा, पदक्खिणं कत्वा अगमासि।

अथ तस्मिंयेव खणे यस्स सेट्ठिपुत्तस्स पठमं गेहं नीता, तस्स तं आरब्भ सति उदपादि। नगरेपि नक्खत्तं संघुट्ठं होति। सो उपट्ठाके आह – ''तदा इध आनीता सेट्ठिधीता अत्थि, कहं सा''ति? ''कुलगेहे सामी''ति। ''आनेथ नं, नक्खत्तं कीळिस्सामा''ति। ते गन्त्वा, तं वन्दित्वा ठिता ''किं, ताता, आगतत्था''ति? ताय पुट्ठा तं पवत्तिं आचिक्खिंसु। ''ताता, मया आभरणभण्डेन चेतियं पूजितं, आभरणं मे नत्थी''ति। ते गन्त्वा सेट्ठिपुत्तस्स आरोचेसुं। ''आनेथ नं, पिळन्धनं लभिस्सामा''ति। ते आनयिंसु। तस्सा सह घरप्पवेसेन सकलगेहं चन्दनगन्धञ्चेव नीलुप्पलगन्धञ्च वायि।

सेट्ठिपुत्तो तं पुच्छि – ''पठमं तव सरीरतो दुग्गन्धो वायि, इदानि पन ते सरीरतो चन्दनगन्धो, मुखतो उप्पलगन्धो वायति। किं एत''न्ति? सा आदितो पट्ठाय अत्तनो कतकम्मं आरोचेसि। सेट्ठिपुत्तो ''निय्यानिकं वत बुद्धानं सासन''न्ति पसीदित्वा योजनिकं सुवण्णचेतियं कम्बलकञ्चुकेन परिक्खिपित्वा तत्थ तत्थ रथचक्कप्पमाणेहि सुवण्णपदुमेहि अलङ्करि। तेसं द्वादसहत्था ओलम्बका होन्ति। सो तत्थ यावतायुकं ठत्वा सग्गे निब्बत्तित्वा ततो चुतो बाराणसितो योजनमत्ते ठाने अञ्ञतरस्मिं अमच्चकुले निब्बत्ति। सेट्ठिकञ्ञा देवलोकतो चवित्वा राजकुले जेट्ठधीता हुत्वा निब्बत्ति।

तेसु वयप्पत्तेसु कुमारस्स वसनगामे नक्खत्तं संघुट्ठं, सो मातरं आह – ''साटकं मे अम्म देहि, नक्खत्तं कीळिस्सामी''ति। सा धोतवत्थं नीहरित्वा अदासि। ''अम्म थूलं इद''न्ति। अञ्ञं नीहरित्वा अदासि, तम्पि पटिक्खिपि। अञ्ञं नीहरित्वा अदासि, तम्पि पटिक्खिपि। अथ नं माता आह – ''तात, यादिसे गेहे मयं जाता, नत्थि नो इतो सुखुमतरस्स पटिलाभाय पुञ्ञ''न्ति। ''लभनट्ठानं गच्छामि अम्मा''ति। ''पुत्त अहं अज्जेव तुय्हं बाराणसिनगरे रज्जपटिलाभम्पि इच्छामी''ति। सो मातरं वन्दित्वा आह – ''गच्छामि अम्मा''ति। ''गच्छ, ताता''ति। एवं किरस्सा चित्तं अहोसि – ''कहं गमिस्सति, इध वा एत्थ वा गेहे निसीदिस्सती''ति? सो पन पुञ्ञनियामेन निक्खमित्वा बाराणसिं गन्त्वा उय्याने मङ्गलसिलापट्टे ससीसं पारुपित्वा निपज्जि। सो चा बाराणसिरञ्ञो कालङ्कतस्स सत्तमो दिवसो होति।

अमच्चा रञ्ञो सरीरकिच्चं कत्वा राजङ्गणे निसीदित्वा मन्तयिंसु – ''रञ्ञो एका धीताव अत्थि, पुत्तो नत्थि। अराजकं रज्जं न तिट्ठति। को राजा होती''ति मन्तेत्वा, ''त्वं होहि, त्वं होही''ति। पुरोहितो आह – ''बहुं ओलोकेतुं न वट्टति, फुस्सरथं विस्सज्जेमा''ति। ते कुमुदवण्णे चत्तारो सिन्धवे योजेत्वा, पञ्चविधं राजककुधभण्डं सेतच्छत्तञ्च रथस्मिंयेव ठपेत्वा रथं विस्सज्जेत्वा पच्छतो तूरियानि पग्गण्हापेसुं। रथो पाचीनद्वारेन निक्खमित्वा उय्यानाभिमुखो अहोसि, ''परिचयेन उय्यानाभिमुखो गच्छति, निवत्तेमा''ति केचि आहंसु। पुरोहितो ''मा निवत्तयित्था''ति आह। रथो कुमारं पदक्खिणं कत्वा आरोहनसज्जो हुत्वा अट्ठासि। पुरोहितो पारुपनकण्णं अपनेत्वा पादतलानि ओलोकेन्तो ''तिट्ठतु अयं दीपो, द्विसहस्सदीपपरिवारेसु चतूसु दीपेसु एस रज्जं कातुं युत्तो''ति वत्वा, ''पुनपि तूरियानि पग्गण्हाथ पुनपि पग्गण्हाथा''ति तिक्खत्तुं तूरियानि पग्गण्हापेसि।

अथ कुमारो मुखं विवरित्वा ओलोकेत्वा, ''केन कम्मेन आगतत्था''ति? आह। ''देव, तुम्हाकं रज्जं पापुणाती''ति। ''राजा कह''न्ति। ''देवत्तं गतो सामी''ति। ''कति दिवसा अतिक्कन्ता''ति? ''अज्ज सत्तमो दिवसो''ति। ''पुत्तो वा धीता वा नत्थी''ति। ''धीता अत्थि देव, पुत्तो नत्थी''ति। ''तेन हि करिस्सामि रज्ज''न्ति। ते तावदेव अभिसेकमण्डपं कत्वा राजधीतरं सब्बालङ्कारेहि अलङ्करित्वा उय्यानं आनेत्वा कुमारस्स अभिसेकं अकंसु।

अथस्स कताभिसेकस्स सतसहस्सग्घनिकं वत्थं उपहरिंसु। सो ''किमिदं, ताता''ति? आह। ''निवासनवत्थं देवा''ति। ''ननु, ताता, थूल''न्ति। ''मनुस्सानं परिभोगवत्थेसु इतो सुखुमतरं नत्थि देवा''ति। ''तुम्हाकं राजा एवरूपं निवासेसी''ति? ''आम, देवा''ति। ''न मञ्ञे पुञ्ञवा तुम्हाकं राजा, सुवण्णभिङ्गारं आहरथ, लभिस्साम वत्थ''न्ति। सुवण्णभिङ्गारं आहरिंसु। सो उट्ठाय हत्थे धोवित्वा, मुखं विक्खालेत्वा, हत्थेन उदकं आदाय, पुरत्थिमदिसाय अब्भुक्किरि, घनपथविं भिन्दित्वा अट्ठ कप्परुक्खा उट्ठहिंसु। पुन उदकं गहेत्वा दक्खिणं पच्छिमं उत्तरन्ति एवं चतस्सो दिसा अब्भुक्किरि, सब्बदिसासु अट्ठ अट्ठ कत्वा द्वत्तिंस कप्परुक्खा उट्ठहिंसु। सो एकं दिब्बदुस्सं निवासेत्वा एकं पारुपित्वा ''नन्दरञ्ञो विजिते सुत्तकन्तिका इत्थियो मा सुत्तं कन्तिंसूति एवं भेरिं चारापेथा''ति वत्वा, छत्तं उस्सापेत्वा, अलङ्कतपटियत्तो हत्थिक्खन्धवरगतो नगरं पविसित्वा, पासादं आरुय्ह महासम्पत्तिं अनुभवि।

एवं काले गच्छन्ते एकदिवसं देवी रञ्ञो सम्पत्तिं दिस्वा, ''अहो तपस्सी''ति कारुञ्ञाकारं दस्सेसि। ''किमिदं देवी''ति? च पुट्ठा, ''अतिमहती, देव, सम्पत्ति, अतीते बुद्धानं सद्दहित्वा कल्याणं अकत्थ, इदानि अनागतस्स पच्चयं कुसलं न करोथा''ति? आह। ''कस्स दस्सामि? सीलवन्तो नत्थी''ति। ''असुञ्ञो, देव, जम्बुदीपो अरहन्तेहि, तुम्हे दानमेव सज्जेथ, अहं अरहन्ते लच्छामी''ति आह। राजा पुनदिवसे पाचीनद्वारे दानं सज्जापेसि। देवी पातोव उपोसथङ्गानि अधिट्ठाय उपरिपासादे पुरत्थाभिमुखा उरेन निपज्जित्वा – ''सचे एतिस्सा दिसाय अरहन्तो अत्थि, आगच्छन्तु अम्हाकं भिक्खं गण्हन्तू''ति आह। तस्सं दिसायं अरहन्तो नाहेसुं। तं सक्कारं कपणद्धिकयाचकानं अदंसु।

पुनदिवसे दक्खिणद्वारे दानं सज्जेत्वा तथेव अकासि, पुनदिवसे पच्छिमद्वारे। उत्तरद्वारे सज्जितदिवसे पन देविया तथेव निमन्तेन्तिया हिमवन्ते वसन्तानं पदुमवतिया पुत्तानं पञ्चसतानं पच्चेकबुद्धानं जेट्ठको महापदुमपच्चेकबुद्धो भातिके आमन्तेसि ''मारिसा, नन्दराजा तुम्हे निमन्तेति, अधिवासेथ तस्सा''ति। ते अधिवासेत्वा पुनदिवसे अनोतत्तदहे मुखं धोवित्वा आकासेन आगन्त्वा उत्तरद्वारे ओतरिंसु। मनुस्सा गन्त्वा ''पञ्चसता, देव, पच्चेकबुद्धा आगता''ति रञ्ञो आरोचेसुं। राजा सद्धिं देविया गन्त्वा वन्दित्वा पत्तं गहेत्वा पच्चेकबुद्धे पासादं आरोपेत्वा तेसं दानं दत्वा भत्तकिच्चावसाने राजा सङ्घत्थेरस्स, देवी सङ्घनवकस्स पादमूले निपज्जित्वा, ''अय्या पच्चयेहि न किलमिस्सन्ति, मयं पुञ्ञेन न हायिस्साम, अम्हाकं यावजीवं इध निवासाय पटिञ्ञं देथा''ति पटिञ्ञं कारेत्वा उय्याने पञ्च पण्णसालासतानि पञ्च चङ्कमनसतानीति सब्बाकारेन निवासट्ठानं सम्पादेत्वा तत्थ वसापेसुं।

एवं काले गच्छन्ते रञ्ञो पच्चन्तो कुपितो। ''अहं पच्चन्तं वूपसमेतुं गच्छामि, त्वं पच्चेकबुद्धेसु मा पमज्जी''ति देविं ओवदित्वा गतो। तस्मिं अनागतेयेव पच्चेकबुद्धानं आयुसङ्खारा खीणा। महापदुमपच्चेकबुद्धो तियामरत्तिं झानकीळं कीळित्वा अरुणुग्गमने आलम्बनफलकं आलम्बित्वा ठितकोव अनुपादिसेसाय निब्बानधातुया परिनिब्बायि, एतेनुपायेन सेसापीति सब्बेपि परिनिब्बुता। पुनदिवसे देवी पच्चेकबुद्धानं निसीदनट्ठानं हरितूपलित्तं कारेत्वा पुप्फानि विकिरित्वा धूपं दत्वा तेसं आगमनं ओलोकयन्ती निसिन्ना आगमनं अपस्सन्ती पुरिसं पेसेसि – ''गच्छ, तात, जानाहि, किं अय्यानं किञ्चि अफासुक''न्ति? सो गन्त्वा महापदुमस्स पण्णसालाय द्वारं विवरित्वा तत्थ अपस्सन्तो चङ्कमनं गन्त्वा आलम्बनफलकं निस्साय ठितं दिस्वा वन्दित्वा, ''कालो, भन्ते''ति आह। परिनिब्बुतसरीरं किं कथेस्सति? सो ''निद्दायति मञ्ञे''ति गन्त्वा पिट्ठिपादे हत्थेन परामसि। पादानं सीतलताय चेव थद्धताय च परिनिब्बुतभावं ञत्वा दुतियस्स सन्तिकं अगमासि, एवं ततियस्साति सब्बेसं परिनिब्बुतभावं ञत्वा राजकुलं गतो। ''कहं, तात, पच्चेकबुद्धा''ति? पुट्ठो ''परिनिब्बुता, देवी''ति आह। देवी कन्दन्ती रोदन्ती निक्खमित्वा नागरेहि सद्धिं तत्थ गन्त्वा साधुकीळितं कारेत्वा पच्चेकबुद्धानं सरीरकिच्चं कत्वा धातुयो गहेत्वा चेतियं पतिट्ठापेसि।

राजा पच्चन्तं वूपसमेत्वा आगतो पच्चुग्गमनं आगतं देविं पुच्छि ''किं, भद्दे, पच्चेकबुद्धेसु नप्पमज्जि, निरोगा अय्या''ति? ''परिनिब्बुता देवा''ति। राजा चिन्तेसि – ''एवरूपानम्पि पण्डितानं मरणं उप्पज्जति, अम्हाकं कुतो मोक्खो''ति? सो नगरं अगन्त्वा उय्यानमेव पविसित्वा जेट्ठपुत्तं पक्कोसापेत्वा तस्स रज्जं पटियादेत्वा सयं समणकपब्बज्जं पब्बजि, देवीपि ''इमस्मिं पब्बजिते अहं किं करिस्सामी''ति? तत्थेव उय्याने पब्बजिता। द्वेपि झानं भावेत्वा ततो चुता ब्रह्मलोके निब्बत्तिंसु।

तेसु तत्थेव वसन्तेसु अम्हाकं सत्था लोके उप्पज्जित्वा पवत्तितवरधम्मचक्को अनुपुब्बेन राजगहं पाविसि। अयं पिप्पलिमाणवो मगधरट्ठे महातित्थब्राह्मणगामे कपिलब्राह्मणस्स अग्गमहेसिया कुच्छिम्हि निब्बत्तो, अयं भद्दा कापिलानी मद्दरट्ठे सागलनगरे कोसियगोत्तब्राह्मणस्स अग्गमहेसिया कुच्छिस्मिं निब्बत्ता। तेसं खो अनुक्कमेन वड्ढमानानं पिप्पलिमाणवस्स वीसतिमे वस्से भद्दाय सोळसमे वस्से सम्पत्ते मातापितरो पुत्तं ओलोकेत्वा, ''तात, त्वं वयप्पत्तो, कुलवंसो नाम पतिट्ठपेतब्बो''ति अतिविय निप्पीळयिंसु। माणवो आह – ''मय्हं सोतपथे एवरूपं कथं मा कथेथ। अहं याव तुम्हे धरथ, ताव पटिजग्गिस्सामि, तुम्हाकं पच्छतो निक्खमित्वा पब्बजिस्सामी''ति। ते कतिपाहं अतिक्कमित्वा पुन कथयिंसु, सोपि तथेव पटिक्खिपि। पुन कथयिंसु, पुनपि पटिक्खिपि। ततो पट्ठाय माता निरन्तरं कथेतियेव।

माणवो ''मम मातरं सञ्ञापेस्सामी''ति रत्तसुवण्णस्स निक्खसहस्सं दत्वा सुवण्णकारेहि एकं इत्थिरूपं कारापेत्वा तस्स मज्जनघट्टनादिकम्मपरियोसाने तं रत्तवत्थं निवासापेत्वा वण्णसम्पन्नेहि पुप्फेहि चेव नानाअलङ्कारेहि च अलङ्कारापेत्वा मातरं पक्कोसापेत्वा आह – ''अम्म एवरूपं आरम्मणं लभन्तो गेहे वसामि, अलभन्तो न वसामी''ति। पण्डिता ब्राह्मणी चिन्तेसि – ''मय्हं पुत्तो पुञ्ञवा दिन्नदानो कताभिनीहारो, पुञ्ञं करोन्तो न एककोव अकासि, अद्धा एतेन सह कतपुञ्ञा सुवण्णरूपकपटिभागा भविस्सती''ति अट्ठ ब्राह्मणे पक्कोसापेत्वा सब्बकामेहि सन्तप्पेत्वा सुवण्णरूपकं रथं आरोपेत्वा, ''गच्छथ, ताता, यत्थ अम्हाकं जातिगोत्तभोगेहि समानकुले एवरूपं दारिकं पस्सथ, इममेव सुवण्णरूपकं, पण्णाकारं कत्वा देथा''ति उय्योजेसि।

ते ''अम्हाकं नाम एतं कम्म''न्ति निक्खमित्वा, ''कत्थ गमिस्सामा''ति? चिन्तेत्वा, ''मद्दरट्ठं नाम इत्थाकरो, मद्दरट्ठं गमिस्सामा''ति मद्दरट्ठे सागलनगरं अगमिंसु। तत्थ तं सुवण्णरूपकं न्हानतित्थे ठपेत्वा एकमन्तं निसीदिंसु। अथ भद्दाय धाती भद्दं न्हापेत्वा अलङ्करित्वा सिरिगब्भे निसीदापेत्वा न्हायितुं आगच्छन्ती तं रूपकं दिस्वा, ''अय्यधीता मे इधागता''ति सञ्ञाय तज्जेत्वा ''दुब्बिनिते, किं त्वं इधागता''ति? तलसत्तिकं उग्गिरित्वा, ''गच्छ सीघ''न्ति गण्डपस्से पहरि। हत्थो पासाणे पटिहतो विय कम्पित्थ। सा पटिक्कमित्वा ''एवं थद्धं नाम महागीवं दिस्वा, 'अय्यधीता मे'ति सञ्ञं उप्पादेसिं, अय्यधीताय हि मे अयं निवासनपटिग्गाहिकापि अयुत्ता''ति आह। अथ नं ते मनुस्सा परिवारेत्वा ''एवरूपा ते सामिधीता''ति पुच्छिंसु। ''किं एसा, इमाय सतगुणेन सहस्सगुणेन मय्हं अय्या अभिरूपतरा, द्वादसहत्थे गब्भे निसिन्नाय पदीपकिच्चं नत्थि, सरीरोभासेनेव तमं विधमती''ति। ''तेन हि आगच्छा''ति तं खुज्जं गहेत्वा सुवण्णरूपकं रथं आरोपेत्वा कोसियगोत्तस्स घरद्वारे ठत्वा आगमनं निवेदयिंसु।

ब्राह्मणो पटिसन्थारं कत्वा, ''कुतो आगतत्था''ति? पुच्छि। ''मगधरट्ठे महातित्थगामे कपिलब्राह्मणस्स घरतो''ति। ''किं कारणा आगता''ति। ''इमिना नाम कारणेना''ति। ''कल्याणं, ताता, समजातिगोत्तविभवो अम्हाकं ब्राह्मणो, दस्सामि दारिक''न्ति पण्णाकारं गण्हि। ते कपिलब्राह्मणस्स सासनं पहिणिंसु – ''लद्धा दारिका, कत्तब्बं करोथा''ति। तं सासनं सुत्वा पिप्पलिमाणवस्स आरोचयिंसु – ''लद्धा किर दारिका''ति। माणवो ''अहं न लभिस्सामीति चिन्तेसिं, इमे लद्धाति

च वदन्ति, अनत्थिको हुत्वा पण्णं पेसिस्सामी''ति रहोगतो पण्णं लिखि, ''भद्दा अत्तनो जातिगोत्तभोगानुरूपं घरावासं लभतु, अहं निक्खमित्वा पब्बजिस्सामि, मा पच्छा विप्पटिसारिनी अहोसी''ति। भद्दापि ''असुकस्स किर मं दातुकामा''ति सुत्वा रहोगता पण्णं लिखि, ''अय्यपुत्तो अत्तनो जातिगोत्तभोगानुरूपं घरावासं लभतु। अहं निक्खमित्वा पब्बजिस्सामि, मा पच्छा विप्पटिसारी अहोसी''ति। द्वेपि पण्णानि अन्तरामग्गे समागच्छिंसु। ''इदं कस्स पण्ण''न्ति? पिप्पलिमाणवेन भद्दाय पहितन्ति। ''इदं कस्स पण्ण''न्ति? भद्दाय पिप्पलिमाणवस्स पहितन्ति च वुत्ते द्वेपि वाचेत्वा, ''पस्सथ दारकानं कम्म''न्ति फालेत्वा अरञ्ञे छड्डेत्वा समानपण्णं लिखित्वा इतो च एत्तो च पेसेसुं। इति तेसं अनिच्छमानानंयेव समागमो अहोसि।

तंदिवसंयेव च माणवोपि एकं पुप्फदामं गन्थापेसि, भद्दापि एकं गन्थापेसि। तानि आसनमज्झे ठपेत्वा भुत्तसायमासा उभोपि ''सयनं आरुहिस्सामा''ति समागन्त्वा माणवो दक्खिणपस्सेन सयनं आरुहि। भद्दा वामपस्सेन आरुहित्वा आह – ''यस्स पस्से पुप्फानि मिलायन्ति, तस्स रागचित्तं उप्पन्नन्ति विजानिस्साम, इमं पुप्फदामं न अल्लीयितब्ब''न्ति। ते पन अञ्ञमञ्ञस्स सरीरसम्फस्सभयेन तियामरत्तिं निद्दं अनोक्कमन्ताव वीतिनामेन्ति, दिवा पन हसितमत्तम्पि न होति। ते लोकामिसेन असंसट्ठा याव मातापितरो धरन्ति, ताव कुटुम्बं अविचारेत्वा तेसु कालङ्कतेसु विचारयिंसु। महती माणवस्स सम्पत्ति, एकदिवसं सरीरं उब्बट्टेत्वा छड्डेतब्बं सुवण्णचुण्णमेव मगधनाळिया द्वादसनाळिमत्तं लद्धुं वट्टति। यन्तबद्धानि सट्ठि महातळाकानि, कम्मन्तो द्वादसयोजनिको, अनुराधपुरप्पमाणा चुद्दस दासगामा, चुद्दस हत्थानीका, चुद्दस अस्सानीका, चुद्दस रथानीका।

सो एकदिवसं अलङ्कतं अस्सं आरुय्ह महाजनपरिवुतो कम्मन्तं गन्त्वा खेत्तकोटियं ठितो नङ्गलेहि भिन्नट्ठानतो काकादयो सकुणे गण्डुप्पादकादिपाणे उद्धरित्वा खादन्ते दिस्वा, ''ताता, इमे किं खादन्ती''ति पुच्छि? ''गण्डुप्पादके अय्या''ति। ''एतेहि कतं पापं कस्स होती''ति? ''तुम्हाकं, अय्या''ति। सो चिन्तेसि – ''सचे एतेहि कतं पापं मय्हं होति, किं मे करिस्सति सत्तअसीतिकोटिधनं? किं द्वादसयोजनो कम्मन्तो, किं यन्तबद्धानि सट्ठि महातळाकानि, किं चुद्दस गामा? सब्बमेतं भद्दाय कापिलानिया निय्यातेत्वा निक्खमित्वा पब्बजिस्सामी''ति।

भद्दापि कापिलानी तस्मिं खणे अब्भन्तरवत्थुम्हि तयो तिलकुम्भे पत्थरापेत्वा धातीहि परिवुता निसिन्ना काके तिलपाणके खादमाने दिस्वा, ''अम्मा किं इमे खादन्ती''ति? पुच्छि। ''पाणके अय्ये''ति। ''अकुसलं कस्स होती''ति? ''तुम्हाकं अय्ये''ति। सा चिन्तेसि – ''मय्हं चतुहत्थवत्थं नाळिकोदनमत्तञ्च लद्धुं वट्टति, यदि च पनेतं एत्तकेन जनेन कतं अकुसलं मय्हं होति, भवसहस्सेनपि वट्टतो सीसं उक्खिपितुं न सक्का, अय्यपुत्ते आगतमत्तेयेव सब्बं तस्स निय्यातेत्वा निक्खम्म पब्बजिस्सामी''ति।

माणवो आगन्त्वा न्हत्वा पासादं आरुय्ह महारहे पल्लङ्के निसीदि, अथस्स चक्कवत्तिनो अनुच्छविकं भोजनं सज्जयिंसु। द्वेपि भुञ्जित्वा परिजने निक्खन्ते रहोगता फासुकट्ठाने निसीदिंसु। ततो माणवो भद्दं आह – ''भद्दे, त्वं इमं घरं आगच्छन्ती कित्तकं धनं आहरी''ति? ''पञ्चपण्णास सकटसहस्सानि अय्या''ति। ''एतं सब्बं, या च इमस्मिं घरे सत्तअसीतिकोटियो, यन्तबद्धा सट्ठितळाकादिभेदा सम्पत्ति अत्थि, सब्बं तुय्हंयेव निय्यातेमी''ति। ''तुम्हे पन अय्या''ति। ''अहं पब्बजिस्सामी''ति। ''अय्या अहम्पि तुम्हाकंयेव आगमनं ओलोकयमाना निसिन्ना, अहम्पि पब्बजिस्सामी''ति। तेसं आदित्तपण्णकुटि विय तयो भवा उपट्ठहिंसु। ते ''पब्बजिस्सामा''ति वत्वा अन्तरापणतो कसायरसपीतानि वत्थानि मत्तिकापत्ते च आहरापेत्वा अञ्ञमञ्ञं केसे ओहारेत्वा, ''ये लोके अरहन्तो, ते उद्दिस्स अम्हाकं पब्बज्जा''ति पब्बजित्वा थविकासु पत्ते ओसापेत्वा अंसे लग्गेत्वा पासादतो ओतरिंसु। गेहे दासेसु च कम्मकारेसु च न कोचि सञ्जानि।

अथ ने ब्राह्मणगामतो निक्खम्म दासगामद्वारेन गच्छन्ते आकप्पकुत्तवसेन दासगामवासिनो सञ्जानिंसु। ते रुदन्ता पादेसु निपतित्वा ''किं अम्हे अनाथे करोथ अय्या''ति? आहंसु। ''मयं, भणे 'आदित्तपण्णसाला विय तयो भवा'ति पब्बजिम्हा, सचे तुम्हेसु एकेकं भुजिस्सं करोम, वस्ससतम्पि नप्पहोति, तुम्हेव तुम्हाकं सीसं धोवित्वा भुजिस्सा हुत्वा जीवथा''ति वत्वा तेसं रोदन्तानंयेव पक्कमिंसु। थेरो पुरतो गच्छन्तो निवत्तित्वा ओलोकेन्तो चिन्तेसि – ''अयं भद्दा कापिलानी सकलजम्बुदीपग्घनिका इत्थी मय्हं पच्छतो आगच्छति। ठानं खो पनेतं विज्जति, यं कोचिदेव एवं चिन्तेय्य 'इमे पब्बजित्वापि विना भवितुं न सक्कोन्ति, अननुच्छविकं करोन्ती''ति। ''कोचि वा पन मनं पदूसेत्वा अपायपूरको भवेय्य। इमं पहाय मया गन्तुं वट्टती''ति चित्तं उप्पादेसि।

सो पुरतो गच्छन्तो द्वेधापथं दिस्वा तस्स मत्थके अट्ठासि। भद्दापि आगन्त्वा वन्दित्वा अट्ठासि। अथ नं आह – ''भद्दे, तादिसिं इत्थिं मम पच्छतो आगच्छन्तिं दिस्वा, 'इमे पब्बजित्वापि विना भवितुं न सक्कोन्ती'ति चिन्तेत्वा अम्हेसु पदुट्ठचित्तो महाजनो अपायपूरको भवेय्य। इमस्मिं द्वेधापथे त्वं एकं गण्ह, अहं एकेन गमिस्सामी''ति। ''आम, अय्य, पब्बजितानं मातुगामो नाम मलं, 'पब्बजित्वापि विना न भवन्ती'ति अम्हाकं दोसं पस्सन्ति, तुम्हे एकं मग्गं गण्हथ, विना भविस्सामा''ति तिक्खत्तुं पदक्खिणं कत्वा चतूसु ठानेसु पञ्चपतिट्ठितेन वन्दित्वा दसनखसमोधानसमुज्जलं अञ्जलिं पग्गय्ह, ''सतसहस्सकप्पप्पमाणे अद्धाने कतो मित्तसन्थवो अज्ज भिज्जती''ति वत्वा, ''तुम्हे दक्खिणजातिका नाम, तुम्हाकं दक्खिणमग्गो वट्टति, मयं मातुगामा नाम वामजातिका, अम्हाकं वाममग्गो वट्टती''ति वन्दित्वा मग्गं पटिपन्ना। तेसं द्वेधाभूतकाले अयं महापथवी ''अहं चक्कवाळगिरिसिनेरुपब्बते धारेतुं सक्कोन्तीपि तुम्हाकं गुणे धारेतुं न सक्कोमी''ति वदन्ती विय विरवमाना अकम्पि, आकासे असनिसद्दो विय पवत्ति, चक्कवाळपब्बतो उन्नदि।

सम्मासम्बुद्धो वेळुवनमहाविहारे गन्धकुटियं निसिन्नो पथवीकम्पनसद्दं सुत्वा, ''कस्स नु खो पथवी कम्पती''ति? आवज्जेन्तो ''पिप्पलिमाणवो च भद्दा च कापिलानी मं उद्दिस्स अप्पमेय्यं सम्पत्तिं पहाय पब्बजिता, तेसं वियोगट्ठाने उभिन्नम्पि गुणबलेन अयं पथवीकम्पो जातो, मयापि एतेसं सङ्गहं कातुं वट्टती''ति गन्धकुटितो निक्खम्म सयमेव पत्तचीवरं आदाय, असीतिमहाथेरेसु कञ्चि अनामन्तेत्वा तिगावुतं मग्गं पच्चुग्गमनं कत्वा राजगहस्स च नाळन्दाय च अन्तरे बहुपुत्तकनिग्रोधरुक्खमूले पल्लङ्कं आभुजित्वा निसीदि। निसीदन्तो पन अञ्ञतरो पंसुकूलिको विय अनिसीदित्वा बुद्धवेसं गहेत्वा असीतिहत्था घनबुद्धरस्मियो विस्सज्जेन्तो निसीदि। इति तस्मिं खणे पण्णछत्तसकटचक्ककूटागारादिप्पमाणा बुद्धरस्मियो इतो चितो च विप्फन्दन्तियो विधावन्तियो चन्दिमसहस्ससूरियसहस्सउग्गमनकालो विय कुरुमाना तं वनन्तरं एकोभासं अकंसु। द्वत्तिंसमहापुरिसलक्खणानं सिरिया समुज्जलिततारागणं विय गगनं, सुपुप्फितकमलकुवलयं विय सलिलं, वनन्तरं विरोचित्थ। निग्रोधरुक्खस्स नाम खन्धो सेतो होति, पत्तानि नीलानि पक्कानि रत्तानि। तस्मिं पन दिवसे सतसाखो निग्रोधरुक्खो सुवण्णवण्णो अहोसि।

इति या सा **अद्धानमग्गप्पटिपन्नो**ति पदस्स अत्थं वत्वा, ''इदानि यथा एस पब्बजितो, यथा च अद्धानमग्गं पटिपन्नो। इमस्स अत्थस्स आविभावत्थं अभिनीहारतो पट्ठाय अयं अनुपुब्बिकथा कथेतब्बा''ति वुत्ता, सा एवं वेदितब्बा।

अन्तरा च राजगहं अन्तरा च नाळन्दन्ति राजगहस्स च नाळन्दाय च अन्तरे। **सत्थारञ्च वताहं पस्सेय्यं भगवन्तमेव पस्सेय्य**न्ति सचे अहं सत्थारं पस्सेय्यं, इमंयेव भगवन्तं पस्सेय्यं। न हि मे इतो अञ्ञेन सत्थारा भवितुं सक्काति। **सुगतञ्च वताहं पस्सेय्यं भगवन्तमेव पस्सेय्य**न्ति सचे अहं सम्मापटिपत्तिया सुट्ठु गतत्ता सुगतं नाम पस्सेय्यं, इमंयेव भगवन्तं पस्सेय्यं। न हि मे इतो अञ्ञेन सुगतेन भवितुं सक्काति। **सम्मासम्बुद्धञ्च वताहं पस्सेय्यं भगवन्तमेव**

पस्सेय्यन्ति सचे अहं सम्मा सामञ्च सच्चानि बुद्धत्ता सम्मासम्बुद्धं नाम पस्सेय्यं, इमंयेव भगवन्तं पस्सेय्यं। न हि मे इतो अञ्ञेन सम्मासम्बुद्धेन भवितुं सक्काति अयमेत्थ अधिप्पायो। एवं दस्सनेनेव ''भगवति 'अयं सत्था, अयं सुगतो, अयं सम्मासम्बुद्धो'ति निक्कङ्खो अहं, आवुसो, अहोसि''न्ति दीपेति। **सत्था मे, भन्ते**ति इदं किञ्चापि द्वे वारे आगतं, तिक्खत्तुं पन वुत्तन्ति वेदितब्बं। इमिना हि सो ''एवं तिक्खत्तुं सावकत्तं सावेसिं, आवुसो''ति दीपेति।

अजानञ्ञेवाति अजानमानोव। दुतियपदेपि एसेव नयो। **मुद्धापि तस्स विपतेय्या**ति यस्स अञ्ञस्स ''अजानंयेव जानामी''ति पटिञ्ञस्स बाहिरकस्स सत्थुनो एवं सब्बचेतसा समन्नागतो पसन्नचित्तो सावको एवरूपं परमनिपच्चकारं करेय्य, तस्स वण्टछिन्नतालपक्कं विय गीवतो मुद्धापि विपतेय्य, सत्तधा पन फलेय्याति अत्थो। किं वा एतेन, सचे महाकस्सपत्थेरो इमिना चित्तप्पसादेन इमं परमनिपच्चकारं महासमुद्दस्स करेय्य, तत्तकपाले पक्खित्तउदकबिन्दु विय विलयं गच्छेय्य। सचे चक्कवाळस्स करेय्य, थुसमुट्ठि विय विकिरेय्य। सचे सिनेरुपब्बतस्स करेय्य, काकतुण्डेन पहटपिट्ठमुट्ठि विय विद्धंसेय्य। सचे महापथविया करेय्य, वाताहतभस्मपुञ्जो विय विकिरेय्य। एवरूपोपि पन थेरस्स निपच्चाकारो सत्थु सुवण्णवण्णे पादपिट्ठे लोममत्तम्पि विकोपेतुं नासक्खि। तिट्ठतु च महाकस्सपो, महाकस्सपसदिसानं भिक्खूनं सहस्सम्पि सतसहस्सम्पि निपच्चाकारदस्सनेन नेव दसबलस्स पादपिट्ठे लोममत्तम्पि विकोपेतुं पंसुकूलचीवरे वा अंसुमत्तम्पि चालेतुं सक्कोति। एवं महानुभावो हि सत्था।

तस्मातिह ते कस्सपाति यस्मा अहं जानन्तो एव ''जानामी''ति, पस्सन्तो एव च ''पस्सामी''ति वदामि, तस्मा, कस्सप, तया एवं सिक्खितब्बं। **तिब्ब**न्ति बहलं महन्तं। **हिरोत्तप्प**न्ति हिरी च ओत्तप्पञ्च। **पच्चुपट्ठितं भविस्सती**ति पठमतरमेव उपट्ठितं भविस्सति। यो हि थेरादीसु हिरोत्तप्पं उपट्ठपेत्वा उपसङ्कमति थेरादयोपि तं सहिरिका सओत्तप्पा च हुत्वा उपसङ्कमन्तीति अयमेत्थ आनिसंसो। **कुसलूपसंहित**न्ति कुसलसन्निस्सितं। **अट्ठिं कत्वा**ति अत्तानं तेन धम्मेन अट्ठिकं कत्वा, तं वा धम्मं ''एस मय्हं अत्थो''ति अट्ठिं कत्वा। **मनसि कत्वा**ति चित्ते ठपेत्वा। **सब्बचेतसा समन्नाहरित्वा**ति चित्तस्स थोकम्पि बहि गन्तुं अदेन्तो सब्बेन समन्नाहारचित्तेन समन्नाहरित्वा। **ओहितसोतो**ति ठपितसोतो, ञाणसोतञ्च पसादसोतञ्च ओदहित्वा मया देसितं धम्मं सक्कच्चमेव सुणिस्सामीति एवञ्हि ते सिक्खितब्बं। **सातसहगता च मे कायगतासती**ति असुभेसु चेव आनापाने च पठमज्झानवसेन सुखसम्पयुत्ता कायगतासति। यो च पनायं तिविधो ओवादो, थेरस्स अयमेव पब्बज्जा च उपसम्पदा च अहोसि।

सरणोति सकिलेसो सइणो हुत्वा। **रट्ठपिण्डं भुञ्जि**न्ति सद्धादेय्यं भुञ्जिं। चत्तारो हि परिभोगा थेय्यपरिभोगो इणपरिभोगो दायज्जपरिभोगो सामिपरिभोगोति। तत्थ दुस्सीलस्स सङ्घमज्झे निसीदित्वा भुञ्जन्तस्सापि परिभोगो **थेय्यपरिभोगो** नाम। कस्मा? चतूसु पच्चयेसु अनिस्सरताय। सीलवतो अपच्चवेक्खितपरिभोगो **इणपरिभोगो** नाम। सत्तन्नं सेखानं परिभोगो **दायज्जपरिभोगो** नाम। खीणासवस्स परिभोगो **सामिपरिभोगो** नाम। इति खीणासवोव सामी हुत्वा अनणो परिभुञ्जति। थेरो अत्तना पुथुज्जनेन हुत्वा परिभुत्तपरिभोगं इणपरिभोगंयेव करोन्तो एवमाह। **अट्ठमिया अञ्ञा उदपादी**ति अट्ठमे दिवसे अरहत्तफलं उप्पज्जि।

अथ खो, आवुसो, भगवा मग्गा ओक्कम्माति मग्गतो ओक्कमनं पठमतरं तंदिवसेयेव अहोसि, अरहत्ताधिगमो पच्छा। देसनावारस्स पन एवं आगतत्ता अरहत्ताधिगमो पठमं दीपितो। कस्मा पन भगवा मग्गा ओक्कन्तोति? एवं किरस्स अहोसि ''इमं भिक्खुं जातिआरञ्ञिकं जातिपंसुकूलिकं जातिएकासनिकं करिस्सामी''ति। तस्मा ओक्कमि।

मुदुका खो त्यायन्ति मुदुका खो ते अयं। इमञ्च पन वाचं भगवा तं चीवरं पदुमपुप्फवण्णेन पाणिना अन्तन्तेन

परामसन्तो आह। कस्मा एवमाहाति? थेरेन सह चीवरं परिवत्तेतुकामताय। कस्मा परिवत्तेतुकामो जातोति? थेरं अत्तनो ठाने ठपेतुकामताय। थेरो पन यस्मा चीवरस्स वा पत्तस्स वा वण्णे कथिते ''इमं तुम्हाकं गण्हथा''तिवचनं चारित्तमेव, तस्मा ''पटिग्गण्हातु मे, भन्ते, भगवा''ति आह। **धारेस्ससि पन मे त्वं, कस्सप, साणानि पंसुकूलानि निब्बसनानी**ति, कस्सप, त्वं इमानि परिभोगजिण्णानि पंसुकूलानि पारुपितुं सक्खिस्ससीति वदति। तञ्च खो न कायबलं सन्धाय, पटिपत्तिपूरणं पन सन्धाय एवमाह। अयञ्हेत्थ अधिप्पायो – अहं इमं चीवरं पुण्णं नाम दासिं पारुपित्वा आमकसुसाने छड्डितं तं सुसानं पविसित्वा तुम्बमत्तेहि पाणकेहि सम्परिकिण्णं ते पाणके विधुनित्वा महाअरियवंसे ठत्वा अग्गहेसिं, तस्स मे इमं चीवरं गहितदिवसे दससहस्सचक्कवाळे महापथवी महाविरवं विरवमाना कम्पित्थ, आकासो तटतटायि, चक्कवाळदेवता साधुकारमदंसु, ''इमं चीवरं गण्हन्तेन भिक्खुना जातिपंसुकूलिकेन जातिआरञ्ञिकेन जातिएकासनिकेन जातिसपदानचारिकेन भवितुं वट्टति, त्वं इमस्स चीवरस्स अनुच्छविकं कातुं सक्खिस्ससी''ति। थेरोपि अत्तना पञ्चन्नं हत्थीनं बलं धारेति, सो तं अतक्कयित्वा ''अहमेतं पटिपत्तिं पूरेस्सामी''ति उस्साहेन सुगतचीवरस्स अनुच्छविकं कातुकामो ''धारेस्सामहं, भन्ते''ति आह। **पटिपज्जि**न्ति पटिपन्नोस्मि। एवं पन चीवरपरिवत्तनं कत्वा च थेरेन पारुतचीवरं भगवा पारुपि, सत्थु चीवरं थेरो। तस्मिं समये महापथवी उदकपरियन्तं कत्वा उन्नदन्ती कम्पित्थ।

भगवतो पुत्तोतिआदीसु थेरो भगवन्तं निस्साय अरियाय जातिया जातोति भगवतो पुत्तो। उरेन वसित्वा मुखतो निक्खन्तओवादवसेन पब्बज्जाय चेव उपसम्पदाय च पतिट्ठितत्ता **ओरसो मुखतो जातो**। ओवादधम्मतो जातत्ता ओवादधम्मेन च निम्मितत्ता **धम्मजो धम्मनिम्मितो**। ओवादधम्मदायादं नवलोकुत्तरधम्मदायादमेव वा अरहतीति **धम्मदायादो। पटिग्गहितानि साणानि पंसुकूलानी**ति सत्थारा पारुतं पंसुकूलचीवरं पारुपनत्थाय पटिग्गहितं।

सम्मा वदमानो वदेय्याति यं पुग्गलं ''भगवतो पुत्तो''तिआदीहि गुणेहि सम्मा वदमानो वदेय्य, ममं तं सम्मा वदमानो वदेय्य, अहं एवरूपोति। एत्तावता थेरेन पब्बज्जा च परिसोधिता होति। अयञ्हेत्थ अधिप्पायो – आवुसो, यस्स न उपज्झायो पञ्ञायति, न आचरियो, किं सो अनुपज्झायो अनाचरियो न्हापितमुण्डको सयंगहितकासावो ''तित्थियपक्कन्तको''ति सङ्खं गतो एवं तिगावुतं मग्गं पच्चुग्गमनं लभति, तीहि ओवादेहि पब्बज्जं वा उपसम्पदं वा लभति, कायेन कायं चीवरपरिवत्तनं लभति? पस्स याव दुब्भासितं वचनं थुल्लनन्दाय भिक्खुनियाति। एवं पब्बज्जं सोधेत्वा इदानि छहि अभिञ्ञाहि सीहनादं नदितुं **अहं खो, आवुसो**तिआदिमाह। सेसं पुरिमनयेनेव वेदितब्बं। एकादसमं।

१२. परंमरणसुत्तवण्णना

१५५. द्वादसमे **तथागतो**ति सत्तो। **न हेतं, आवुसो, अत्थसंहित**न्ति, आवुसो, एतं दिट्ठिगतं अत्थसन्निस्सितं न होति। **नादिब्रह्मचरियक**न्ति मग्गब्रह्मचरियस्स पुब्बभागपटिपदापि न होति। **एतञ्हि, आवुसो, अत्थसंहित**न्ति, आवुसो, एतं चतुसच्चकम्मट्ठानं अत्थसन्निस्सितं। **एतं आदिब्रह्मचरियक**न्ति एतं मग्गब्रह्मचरियस्स आदि पुब्बभागपटिपदा। द्वादसमं।

१३. सद्धम्मप्पतिरूपकसुत्तवण्णना

१५६. तेरसमे **अञ्ञाय सण्ठहिंसू**ति अरहत्ते पतिट्ठहिंसु। **सद्धम्मप्पतिरूपक**न्ति द्वे सद्धम्मप्पतिरूपकानि अधिगमसद्धम्मप्पतिरूपकञ्च परियत्तिसद्धम्मप्पतिरूपकञ्च। तत्थ –

''ओभासे चेव ञाणे च, पीतिया च विकम्पति।
पस्सद्धिया सुखे चेव, येहि चित्तं पवेधति॥

''अधिमोक्खे च पग्गाहे, उपट्ठाने च कम्पति।
उपेक्खावज्जनाय चेव, उपेक्खाय च निकन्तिया॥

''इमानि दस ठानानि, पञ्ञा यस्स परिचिता।
धम्मुद्धच्चकुसलो होति, न च सम्मोह गच्छती''ति॥ (पटि० म० २.७)। –

इदं विपस्सनाञाणस्स उपक्किलेसजातं **अधिगमसद्धम्मप्पतिरूपकं** नाम। तिस्सो पन सङ्गीतियो अनारुळ्हं धातुकथा आरम्मणकथा असुभकथा ञाणवत्थुकथा विज्जाकरण्डकोति इमेहि पञ्चहि कथावत्थूहि परिबाहिरं गुळ्हविनयं गुळ्हवेस्सन्तरं गुळ्हमहोसधं वण्णपिटकं अङ्गुलिमालपिटकं रट्ठपालगज्जितं आळवकगज्जितं वेदल्लपिटकन्ति अबुद्धवचनं **परियत्तिसद्धम्मप्पतिरूपकं** नाम।

जातरूपप्पतिरूपकन्ति सुवण्णरसविधानं आरकूटमयं सुवण्णवण्णं आभरणजातं। छणकालेसु हि मनुस्सा ''आभरणभण्डकं गण्हिस्सामा''ति आपणं गच्छन्ति। अथ ने आपणिका एवं वदन्ति, ''सचे तुम्हे आभरणत्थिका, इमानि गण्हथ। इमानि हि घनानि चेव वण्णवन्तानि च अप्पग्घानि चा''ति। ते तेसं सुत्वा, ''कारणं इमे वदन्ति, इमानि पिळन्धित्वा सक्का नक्खत्तं कीळितुं, सोभन्ति चेव अप्पग्घानि चा''ति तानि गहेत्वा गच्छन्ति। सुवण्णभण्डं अविक्कियमानं निदहित्वा ठपेतब्बं होति। एवं तं जातरूपप्पतिरूपके उप्पन्ने अन्तरधायति नाम।

अथ सद्धम्मस्स अन्तरधानं होतीति अधिगमसद्धम्मस्स पटिपत्तिसद्धम्मस्स परियत्तिसद्धम्मस्साति तिविधस्सापि सद्धम्मस्स अन्तरधानं होति। पठमबोधियञ्हि भिक्खू पटिसम्भिदप्पत्ता अहेसुं। अथ काले गच्छन्ते पटिसम्भिदा पापुणितुं न सक्खिंसु, छळभिञ्ञा अहेसुं। ततो छ अभिञ्ञा पापुणितुं असक्कोन्ता तिस्सो विज्जा पापुणिंसु। इदानि काले गच्छन्ते तिस्सो विज्जा पापुणितुं असक्कोन्ता आसवक्खयमत्तं पापुणिस्सन्ति। तम्पि असक्कोन्ता अनागामिफलं, तम्पि असक्कोन्ता सकदागामिफलं, तम्पि असक्कोन्ता सोतापत्तिफलं। गच्छन्ते काले सोतापत्तिफलम्पि पत्तुं न सक्खिस्सन्ति। अथ नेसं यदा विपस्सना इमेहि उपक्किलेसेहि उपक्किलिट्ठा आरद्धमत्ताव ठस्सति, तदा अधिगमसद्धम्मो अन्तरहितो नाम भविस्सति।

पठमबोधियञ्हि भिक्खू चतुन्नं पटिसम्भिदानं अनुच्छविकं पटिपत्तिं पूरयिंसु। गच्छन्ते काले तं असक्कोन्ता छन्नं अभिञ्ञानं, तम्पि असक्कोन्ता तिस्सन्नं विज्जानं, तम्पि असक्कोन्ता अरहत्तफलमत्तस्स। गच्छन्ते पन काले अरहत्तस्स अनुच्छविकं पटिपत्तिं पूरेतुं असक्कोन्ता अनागामिफलस्स अनुच्छविकं पटिपत्तिं पूरेस्सन्ति, तम्पि असक्कोन्ता सकदागामिफलस्स, तम्पि असक्कोन्ता सोतापत्तिफलस्स। यदा पन सोतापत्तिफलस्सपि अनुच्छविकं पटिपदं पूरेतुं असक्कोन्ता सीलपारिसुद्धिमत्तेव ठस्सन्ति, तदा पटिपत्तिसद्धम्मो अन्तरहितो नाम भविस्सति।

याव पन तेपिटकं बुद्धवचनं वत्तति, न ताव सासनं अन्तरहितन्ति वत्तुं वट्टति। तिट्ठन्तु तीणि वा, अभिधम्मपिटके अन्तरहिते इतरेसु द्वीसु तिट्ठन्तेसुपि अन्तरहितन्ति न वत्तब्बमेव। द्वीसु अन्तरहितेसु विनयपिटकमत्ते ठितेपि, तत्रापि खन्धकपरिवारेसु अन्तरहितेसु उभतोविभङ्गमत्ते, महाविनये अन्तरहिते द्वीसु पातिमोक्खेसु वत्तमानेसुपि सासनं

अनन्तरहितमेव। यदा पन द्वे पातिमोक्खा अन्तरधायिस्सन्ति, अथ परियत्तिसद्धम्मस्स अन्तरधानं भविस्सति। तस्मिं अन्तरहिते सासनं अन्तरहितं नाम होति। परियत्तिया हि अन्तरहिताय पटिपत्ति अन्तरधायति, पटिपत्तिया अन्तरहिताय अधिगमो अन्तरधायति। किं कारणा? अयञ्हि परियत्ति पटिपत्तिया पच्चयो होति, पटिपत्ति अधिगमस्स। इति पटिपत्तितोपि परियत्तिमेव पमाणं।

ननु च कस्सपसम्मासम्बुद्धकाले कपिलो नाम अनाराधकभिक्खु ''पातिमोक्खं उद्दिसिस्सामी''ति बीजनिं गहेत्वा आसने निसिन्नो ''अत्थि इमस्मिं वत्तन्ता''ति पुच्छि, अथ तस्स भयेन येसम्पि पातिमोक्खो वत्तति, तेपि ''मयं वत्तामा''ति अवत्वा ''न वत्तामा''ति वदिंसु, सो बीजनिं ठपेत्वा उट्ठायासना गतो, तदा सम्मासम्बुद्धस्स सासनं ओसक्कितन्ति? किञ्चापि ओसक्कितं, परियत्ति पन एकन्तेनेव पमाणं। यथा हि महतो तळाकस्स पाळिया थिराय उदकं न ठस्सतीति न वत्तब्बं, उदके सति पदुमादीनि पुप्फानि न पुप्फिस्सन्तीति न वत्तब्बं, एवमेव महातळाकस्स थिरपाळिसदिसे तेपिटके बुद्धवचने सति महातळाके उदकसदिसा पटिपत्तिपूरका कुलपुत्ता नत्थीति न वत्तब्बा, तेसु सति महातळाके पदुमादीनि पुप्फानि विय सोतापन्नादयो अरियपुग्गला नत्थीति न वत्तब्बाति एवं एकन्ततो परियत्तियेव पमाणं।

पथवीधातूति द्वे सतसहस्सानि चत्तारि च नहुतानि बहला महापथवी। **आपोधातू**ति पथवितो पट्ठाय याव सुभकिण्हब्रह्मलोका उग्गतं कप्पविनासकं उदकं। **तेजोधातू**ति पथवितो पट्ठाय याव आभस्सरब्रह्मलोका उग्गतो कप्पविनासको अग्गि। **वायोधातू**ति पथवितो पट्ठाय याव वेहप्फलब्रह्मलोका उग्गतो कप्पविनासको वायु। एतेसु हि एकधम्मोपि सत्थु सासनं अन्तरधापेतुं न सक्कोति, तस्मा एवमाह। **इधेव ते उप्पज्जन्ती**ति लोहतो लोहखादकं मलं विय इमस्मिं मय्हंयेव सासने ते उप्पज्जन्ति। **मोघपुरिसा**ति तुच्छपुरिसा।

आदिकेनेव ओपिलवतीति एत्थ **आदिकेना**ति आदानेन गहणेन। **ओपिलवती**ति निमुज्जति। इदं वुत्तं होति – यथा उदकचरा नावा भण्डं गण्हन्ती निमुज्जति, एवं परियत्तिआदीनं पूरणेन सद्धम्मस्स अन्तरधानं न होति। परियत्तिया हि हायमानाय पटिपत्ति हायति, पटिपत्तिया हायमानाय अधिगमो हायति। परियत्तिया पूरयमानाय परियत्तिधरा पुग्गला पटिपत्तिं पूरेन्ति, पटिपत्तिपूरका अधिगमं पूरेन्ति। इति नवचन्दो विय परियत्तियादीसु वड्ढमानासु मय्हं सासनं वड्ढति येवाति दस्सेति।

इदानि येहि धम्मेहि सद्धम्मस्स अन्तरधानञ्चेव ठिति च होति, ते दस्सेन्तो **पञ्च खो**तिआदिमाह। तत्थ **ओक्कमनीया**ति अवक्कमनीया, हेट्ठागमनीयाति अत्थो। **सत्थरि अगारवा**तिआदीसु **अगारवा**ति गारवरहिता। **अप्पतिस्सा**ति अप्पतिस्सया अनीचवुत्तिका। तत्थ यो चेतियङ्गणं आरोहन्तो छत्तं धारेति, उपाहनं धारेति, अञ्ञतो ओलोकेत्वा कथं कथेन्तो गच्छति, अयं **सत्थरि अगारवो** नाम।

यो धम्मस्सवनस्स काले सङ्घुट्ठे दहरसामणेरेहि परिवारितो निसीदति, अञ्ञानि वा नवकम्मादीनि करोति, धम्मस्सवनग्गे निसिन्नो निद्दायति, विक्खित्तो वा अञ्ञं कथेन्तो निसीदति, अयं **धम्मे अगारवो** नाम।

यो थेरुपट्ठानं गन्त्वा, अवन्दित्वा निसीदति, हत्थपल्लत्थिकं दुस्सपल्लत्थिकं करोति, अञ्ञं वा पन हत्थपादकुक्कुच्चं करोति, वुड्ढानं सन्तिके अनज्झिट्ठो कथेति, अयं **सङ्घे अगारवो** नाम।

तिस्सो पन सिक्खा अपूरेन्तोव **सिक्खाय अगारवो** नाम होति। अट्ठ समापत्तियो अनिब्बत्तेन्तो तासं वा पन निब्बत्तनत्थाय पयोगं अकरोन्तो **समाधिस्मिं अगारवो** नाम। सुक्कपक्खो वुत्तविपल्लासेनेव वेदितब्बोति। तेरसमं।

कस्सपसंयुत्तवण्णना निट्ठिता।

६. लाभसक्कारसंयुत्तं

१. पठमवग्गो

१. दारुणसुत्तवण्णना

१५७. लाभसक्कारसंयुत्तस्स पठमे **दारुणो**ति थद्धो। **लाभसक्कारसिलोको**ति एत्थ **लाभो** नाम चतुपच्चयलाभो। **सक्कारो**ति तेसंयेव सुकतानं सुसङ्खतानं लाभो। **सिलोको**ति वण्णघोसो। **कटुको**ति तिखिणो। **फरुसो**ति खरो। **अन्तरायिको**ति अन्तरायकरो। पठमं।

२. बळिससुत्तवण्णना

१५८. दुतिये **बाळिसिको**ति बळिसं गहेत्वा चरमानो मच्छघातको। **आमिसगत**न्ति आमिसमक्खितं। **आमिसचक्खू**ति आमिसे चक्खु दस्सनं अस्साति आमिसचक्खु। **गिलबळिसो**ति गिलितबळिसो। **अनयं आपन्नो**ति दुक्खं पत्तो। **ब्यसनं आपन्नो**ति विनासं पत्तो। **यथाकामकरणीयो**ति यथाकामेन यथारुचिया यथेव नं बाळिसिको इच्छति, तथेवस्स कत्तब्बोति अत्थो। **यथाकामकरणीयो पापिमतो**ति यथा किलेसमारस्स कामो, एवं कत्तब्बो, निरयं वा तिरच्छानयोनिं वा पेत्तिविसयं वा पापेतब्बो। दुतियं।

३-४. कुम्मसुत्तादिवण्णना

१५९-१६०. ततिये **महाकुम्मकुल**न्ति महन्तं अट्ठिकच्छपकुलं। **अगमासी**ति ''एत्थ अद्धा किञ्चि खादितब्बं अत्थि, तं मच्छरायन्तो मं एस निवारेती''ति सञ्ञाय अगमासि। **पपताया**ति पपता वुच्चति दीघरज्जुकबद्धो अयकन्तकोसके दण्डकं पवेसेत्वा गहितो कण्णिकसल्लसण्ठानो, अयकण्टको, यस्मिं वेगेन पतित्वा कटाहे लग्गमत्ते दण्डको निक्खमति, रज्जुको एकाबद्धो गच्छतेव। **सो कुम्मो**ति सो विद्धकुम्मो। **येन सो कुम्मो**ति उदकसद्दं सुत्वा सासङ्कट्ठानं भविस्सतीति निवत्तित्वा येन सो अत्थकामो कुम्मो। **न दानि त्वं अम्हाक**न्ति इदानि त्वं अमित्तहत्थं गतो, न अम्हाकं सन्तकोति अत्थो। एवं सल्लपन्तानंयेव च नेसं नावाय ठितो लुद्दो रज्जुकं आकड्ढित्वा कुम्मं गहेत्वा यथाकामं अकासि। सेसमेत्थ इतो अनन्तरसुत्ते च उत्तानमेव। ततियचतुत्थानि।

५. मीळहकसुत्तवण्णना

१६१. पञ्चमे **मीळहका**ति गूथपाणका। **गूथादी**ति गूथभक्खा। **गूथपूरा**ति अन्तो गूथेन भरिता। **पुण्णा गूथस्सा**ति इदं पुरिमस्सेव अत्थदीपनं। **अतिमञ्ञेय्या**ति पच्छिमपादे भूमियं ठपेत्वा पुरिमपादे गूथस्स उपरि आरोपेत्वा ठिता ''अहम्हि गूथादी''ति भणन्ती अतिमञ्ञेय्य। **पिण्डपातो चस्स पूरो**ति अपरोपिस्स पत्तपूरो पणीतपिण्डपातो भवेय्य। पञ्चमं।

६. असनिसुत्तवण्णना

१६२. छट्ठे **कं, भिक्खवे, असनिविचक्क**न्ति, भिक्खवे, कं पुग्गलं मत्थके पतित्वा मद्दमानं सुक्कासनिचक्कं

आगच्छतु। **अप्पत्तमानस**न्ति अनधिगतारहत्तं। इति भगवा न सत्तानं दुक्खकामताय, आदीनवं पन दस्सेतुं एवमाह। असनिचक्कञ्हि मत्थके पतितं एकमेव अत्तभावं नासेति, लाभसक्कारसिलोकेन परियादिण्णचित्तो निरयादीसु अनन्तदुक्खं अनुभोति। छट्ठं।

७. दिद्धसुत्तवण्णना

१६३. सत्तमे **दिद्धगतेना**ति गतदिद्धेन। **विसल्लेना**ति विसमक्खितेन। **सल्लेना**ति सत्तिया। सत्तमं।

८. सिङ्गालसुत्तवण्णना

१६४. अट्ठमे **सिङ्गालो**ति जरसिङ्गालो। यथा हि सुवण्णवण्णोपि कायो पूतिकायो त्वेव, तंखणं गळितम्पि च मुत्तं पूतिमुत्तन्त्वेव वुच्चति, एवं तदहुजातोपि सिङ्गालो जरसिङ्गालोत्वेव वुच्चति। **उक्कण्टकेन नामा**ति एवंनामकेन रोगेन। सो किर सीतकाले उप्पज्जति। तस्मिं उप्पन्ने सकलसरीरतो लोमानि पतन्ति, सकलसरीरं निल्लोमं हुत्वा, समन्ततो फुटति, वातब्भाहता वणा रुज्जन्ति। यथा उम्मत्तकसुनखेन दट्ठो पुरिसो अनवट्ठितोव भमति, एवं तस्मिं उप्पन्ने भमितब्बो होति, असुकट्ठाने सोत्थि भविस्सतीति न पञ्ञायति। अट्ठमं।

९. वेरम्भसुत्तवण्णना

